॥ श्रीरामस्तोत्राणि ॥

१. ॥ अथ श्रीरामद्वादशनामस्तोत्रम् ॥

अस्य श्रीरामद्वादशनामस्तोत्रमहामन्त्रस्य, निटिलाक्षो भगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीरामचन्द्रो देवता; श्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः ।

ओम् प्रथमं श्रीकरं नित्यं द्वितीयं[ततो] दशरथात्मजम् ।
तृतीयं रामचन्द्रं च चतुर्थं रावणान्तकम् ॥ १ ॥

पञ्चमं लोकपूज्यं च षष्ठमं[ष्ठं श्री]जानकीप्रियम् ।
सप्तमं वासुदेवं च रामचन्द्रं तथाष्टमम् ॥ २ ॥

नवमं[ततो]दूर्वादलश्यामं दशमं लक्ष्मणाग्रजम् ।
एकादशं च गोविन्दं द्वादशं सेतुबन्धनम् ॥ ३ ॥

एतानि द्वादशनामानि [द्वादशैतानि नामानि]त्रिसन्ध्यं यः पठेन्नरः ।
दारिद्र्यदोषनिर्मुक्तो धनधान्यसमृद्धिकम [मान्] ॥ ४ ॥

[सर्वसंपत्प्रदं श्रेष्ठं]सर्वकार्यवशीकरम् ।
दिव्यदेहमवाप्नोति दीर्घमायुष्यवर्धनम् ॥ ५ ॥

ग्रहरोग[दोष]विनाशं च सर्वकार्यफलप्रदम् ।
अरण्ये देवसंग्रामे महाभयनिवारणम् ॥ ६ ॥

अर्धरात्रं जपेत् स्थित्वा सर्वारिष्टनिवारणम् ।
इहजन्मसुखी भूत्वा तद्विष्णोः परमं [यायाद्विष्णोः परं] पदम् ॥ ७ ॥

॥ इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे श्रीरामद्वादशनामस्तोत्रं सम्पूर्णम् ॥

---

२. ॥ अथ श्रीरामकर्मनामाष्टाविंशत्युत्तरशतस्तोत्रम् ॥

अस्य श्रीरामकर्मनामाष्टाविंशत्युत्तरशतरहस्यस्तोत्रमन्त्रस्य, वाल्मीकिर्भगवान् ऋषिः, अनुष्टुप् छन्दः, श्रीरामचन्द्रः पौलस्त्यविध्वंसकः परमात्मा देवता; श्रीरामचन्द्रसिद्धयर्थे जपे विनियोगः ।

परमात्मा परब्रह्म सच्चिदानन्दविग्रहः ।
मायामयमहालीलः स्वयंभूर्विष्णुरव्ययः ॥ १ ॥

लक्ष्मीक्ष्मानित्यसेव्यः शङ्खचक्रगदाधरः ।
अनन्तशयनः सर्वदेवप्रियकरः सदा ॥ २ ॥

सुरवैरिकुलध्वंसी मायामानुषविग्रहः ।
श्रीरामो रामचन्द्रश्च रामभद्र इति श्रुतः ॥ ३ ॥

प्रभुर्लक्ष्मणशत्रुघ्नकैकेयीतनयाग्रजः ।
सर्वप्रियो दाशरथिः कौसल्यानन्दवर्धनः ॥ ४ ॥

सर्वलक्षणसम्पन्नः सर्वज्ञः सद्गुणाकरः ।
विश्वामित्रानुयायी च ताटकाप्रविघातनः ॥ ५ ॥

लब्धसर्वास्त्रकौशल्यो मारीचमुखरक्षसाम् ।
शिक्षको यज्ञगोप्ता च गाधिसूनुकथारुचिः ॥ ६ ॥

विशदं पूजितोऽहल्यापावनो जनकार्चितः ।
शतानन्दकथाप्रीतः शैवकोदण्डखण्डनः ॥ ७ ॥

जानकीवल्लभः श्रीमान् कृतकौतुकमङ्गलः ।
जामदग्न्यमहादर्पदलनस्तातनन्दनः ॥ ८ ॥

वैदेहीसक्तहृदयः पितृनिर्देशकारकः ।
वनवासपरः पौरप्रजासञ्जयवञ्चकः ॥ ९ ॥

निषादाधिपसेव्यश्च भरद्वाजानुशासितः ।
चित्रकूटकृतावासः सीतासौमित्रिमोदितः ॥ १० ॥

भरतानुग्रहीता च राज्यार्थन्यस्तपादुकः ।
दृढव्रतो जयन्ताहित्रासानुग्रहकारकः ॥ ११ ॥

अनसूयाङ्गरागादिशोभिसीताभिहर्षितः ।
दण्डकारण्यसञ्चारी विराधवधपण्डितः ॥ १२ ॥

शरभङ्गार्चितः सर्वतापसौघवरप्रदः ।
सुतीक्ष्णपूजितः सीताधर्मोक्तिपरितोषितः ॥ १३ ॥

क्रमेणाध्युषिताशेषतापसाश्रममण्डलः ।
अगस्त्यसत्कृतेन दत्तासिशरकार्मुकः ॥ १४ ॥

कृतपञ्चवटीवासो जटायुर्लब्धसौहृदः ।
पर्यायोदितहेमन्तप्रीतः सीतासमन्वितः ॥ १५ ॥

दुष्टशूर्पणखी[खा]नासाकर्णयुग्मनिकृन्तनः ।
राक्षसीपदवीप्राप्तदग्नरक्षोविभेदनः ॥ १६ ॥

चतुर्दशसहस्रोग्ररक्षोबलनिषूदनः ।
त्रिशिरोदूषणारातिरुन्मत्तखरघातनः ॥ १७ ॥

मैथिलीहृदयानन्दी मायामृगविमर्दनः ।
वैदेहीमार्गणासक्तो जटायुस्सद्गतिप्रदः ॥ १८ ॥

अयोमुखीभङ्गकरः कबन्धभुजखण्डनः ।
शबरीपूजितः सम्यग्दर्शिताश्रमवैभवः ॥ १९ ॥

पम्पातीरे वनोल्लासदर्शनोल्वणमन्मथः ।
हनूमत्कृतसंवादः प्राप्तसुग्रीवसौहृदः ॥ २० ॥

सुग्रीवदत्तवैदेहीत्यक्तवस्त्रविभूषणः ।
सुग्रीवाय प्रतिज्ञातवालिनिर्वापणः स्वयम् ॥ २१ ॥

पाददंष्ट्रसमुत्क्षिप्तमाहिपास्थिसमुत्करः ।
सप्ततालप्रभेत्ता च कृतसुग्रीवलाञ्छनः ॥ २२ ॥

वालिप्रमथनो वाग्मी तारातत्त्वोपदेशकृत् ।
सुग्रीवकृतसङ्केतः सुग्रीवेप्सितराज्यदः ॥ २३ ॥

वर्षासु माल्यवद्वासी लक्ष्मणप्रतिबोधितः ।
ऋक्षवानरसङ्घाती दिक्षु प्रेषितवानरः ॥ २४ ॥

अङ्गुलीयप्रदाता च निश्चितार्थो हनूमति ।
हनुमन्मुखविज्ञातसीतोदन्तः प्रसन्नधीः ॥ २५ ॥

चूडामणिनिरस्ताधिः सीतावाक्यामृताप्लुतः ।
हनूमतः परिष्वङ्गपारितोषिकदायकः ॥ २६ ॥

रक्षोवधाभिनिर्यायी सेनानयविशारदः ।
विभीषणस्याभयदः शरणागतवत्सलः ॥ २७ ॥

समुद्रोपासिता रोषवेगक्षोभितसागरः ।
शिवलिङ्गप्रतिष्ठाता नलसेतुविधायकः २८ ॥

हनुमद्वाहनश्चैव लङ्काद्वारावरोधकः ।
दशग्रीवमहारत्नकिरीटवरभञ्जनः ॥ २९ ॥

उदीर्णकुम्भकर्णादिसर्वरक्षःकुलान्तकः ।
युद्धे रावणहन्ता च ब्रह्मादिसुरसंस्तुतः ॥ ३० ॥

सीतासमेतः शक्रादिवरोत्थापितवानरः ।
सुहृत्सौमित्रिसीताधिरूढपुष्पविमानकः ॥ ३१ ॥

भरद्वाजार्चितः सम्यग्भरतादिसमन्वितः ।
नन्दिग्रामगतः स्नातः सर्वालङ्कारभूषितः ॥ ३२ ॥

अयोध्यापुरवासी च राज्ये पट्टाभिषेचितः ।
तालवृन्तसितच्छत्रचामरान्युपशोभितः ॥ ३३ ॥

जानकीनन्दनः सर्वसुहृद्वर्गाभिहर्षणः ।
हृष्टपुष्टजनाकीर्णः पुरराष्ट्राभिरञ्जनः ॥ ३४ ॥

इत्येवं रामचन्द्रस्य कर्मनाम शुभावहम् ।
अष्टाविंशोत्तरशतं कीर्तितं परमर्षिणा ॥ ३५ ॥

गुह्याद्गुह्यतरं पुण्यं भक्त्या युक्तो नरः सदा ।
यः पठेच्छृणुयाद्वापि सर्वपापैः प्रमुच्यते ॥ ३६ ॥

॥ इति श्रीरामनामाष्टाविंशत्युत्तरशतस्तोत्रं सम्पूर्णम् ॥

---

३. ॥ अथ श्रीतारावलिः ॥

श्रीवत्सवत्सचिह्नाङ्कितवक्षःस्थल धरासुताजाने ।
त्वमिह दयादृष्ट्या मन्दाक्रान्तं रक्ष मां दयाशरधे[ब्धिदाशरथे] ॥ १ ॥

कृतयत्नविफलकारिणमतिकष्टदमर्यमात्मजं मन्दम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ २ ॥

शरणागतरक्षक तव चरणद्वयभक्तिरस्तु मम हृदये ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ३ ॥

अवमानदमापत्करमरिपक्षजयोत्सुकं सुदुःखकरम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ४ ॥

नानापवादभयदं सदनधनद्रव्यनाशकरकुद्दालम् ।
न तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ५ ॥

कुत्सितगुणसम्पन्नं क्रौर्यमनःसंप्रकाशितोद्योगम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ६ ॥

गृध्राशनमतिमलिनं निद्रालस्यादिदोषदं नृणाम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ७ ॥

निस्तुलदारिद्र्यगुणाप्रस्तुतकार्यप्रसक्तिदं नित्यम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ८ ॥

पुत्रकलत्रभ्रात्रा [1]खिलबन्धुविरोधजनकमतिकठिनम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ९ ॥

नीलाञ्जननिभदेहं डोलायितमानसं विडालाक्षम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १० ॥

कुनखयुतं कूर्मपदं कृशगात्रं शङ्कुरूपिणं च सदा ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ ११ ॥

विनिमीलितसन्मीलितलोचनयुतभुजगतोत्तमाङ्गनतम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १२ ॥

गतलज्जाहृदयं निर्भाग्यं बृहदुदरपोषणतिलादम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १३ ॥

आशापिशाचभोगोल्लासकरं दौर्मनस्यदमशुभदम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १४ ॥

आनृतनिष्कृतिवैकृतिकलितमदोद्रेककारणं चाहम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १५ ॥

नरपतिचोरहुताशनभयदानसमर्थमहितकार्यकरम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १६ ॥

कुटिलगतिं कठिनमतिं स्फुटतरकटिघटितबाहुबलचेष्टम् ।
न स्तौमि तमसुरारे परिपालत मां दयाब्धिदाशरथे ॥ १७ ॥

चञ्चलचित्तसमुच्छ्रितमुञ्छकवृत्तिं शनैः शनैर्यानम् ।
न स्तौमि तमसुरारे परिपालय मां दयाब्धिदाशरथे ॥ १८ ॥

सकलजननिन्द्यमबलं विकलाङ्गं कालिमाभमपरेशम् ।
न स्तौमि तमसुरारे परिपलिय मां दयाब्धिदाशरथे ॥ १९ ॥

विगतश्रीको विलोमभावो वीरुचिमुख्यो (?)विविधामयदः ।
किमसौ शनिरिह किं कुरुते मां त्वं परिपालय दाशरथे ॥ २० ॥

जनपददेशविदेशारण्यान्तरपर्यटनद्रुतिबलदः ।
किमसौ शनिरिह किं कुरुते मां त्वं परिपालय दाशरथे ॥ २१ ॥

---

1. अखिला एव आखिलाः

कामक्रोधाद्यरिभूरिभयाकरसञ्चारोऽस्फुटदेहः ।
किमसौ शनिरिह किं कुरुते मां त्वं परिपालय दाशरथे ॥ २२ ॥

दुर्जनवचनश्रवणप्रचुरप्रत्ययदः सत्सङ्गघ्नः ।
किमसौ शनिरिह किं कुरुते मां त्वं परिपालय दशरथे ॥ २३ ॥

आत्मानात्मविचाराभ्यन्तरदोऽवरदः परिभूतमनाः ।
किमसौ शनिरिह किं कुरुते मां त्वं परिपालय दाशरथे ॥ २४ ॥

मायामयजगदखिलभ्रान्तिकरो देहात्मज्ञानहृतः ।
किमसो शनिरिह किं कुरुते मां त्वं परिपालय दाशरथे ॥ २५ ॥

तापत्रयभयदोषनिवारक भद्रगुणौघ दयाशरधे ।
किमसौ शनिरिह किं कुरुते मां त्वं परिपालय दाशरथे ॥ २६ ॥

रत्नकिरीटधराच्युत रामानन्त मुकुन्द दयाशरधे ।
किमसौ शनिरिह किं कुरुते मां त्वं परिपालय दाशरथे ॥ २७ ॥

घनतरमुक्ताफलहारमिवादरणीयेयं दाशरथे ।
तारावलिरनिशं सकलानां सौख्यं नितरां वितनोतु ॥ २८ ॥

श्रीतडकमल्लवंशोद्भवमनिशं कृष्णरायनामधरम् ।
धरणीसुरवरवन्द्यं परिपालय तं प्रभुं दाशरथे ॥ २९ ॥

॥ इति श्रीतारावलिः सम्पूर्णा ॥

---

४. ॥ अथ श्रीरघुनाथस्तवराजः ॥

सूत उवाच—

सर्ववेदार्थतत्त्वज्ञं व्यासं सत्यवतीसुतम् ।
धर्मपुत्रः प्रहृष्टात्मा प्रत्युवाच मुनीश्वरम् ॥ १ ॥

धर्मपुत्र उवाच—

भगवन् योगिनां श्रेष्ठ सर्वशास्त्रविशारद ।
किं तत्त्वं किं परं[जप्यं]किं ध्यानं मुक्तिसाधनम् ।
ज्ञातुमिच्छामि तत्सर्वं ब्रूहि मे मुनिसत्तम ॥ २ ॥

श्रीवेदव्यास उवाच—

धर्मराज महाभाग शृणु वक्ष्यामि तत्परम् ।
यत्परं यद्गुणातीतं यज्ज्योतिरमलं शुभम् ॥ ३ ॥

तदेव परमं नित्यं कैवल्यपदकारणम् ।
श्रीरामेति परं जप्यं तारकब्रह्मसंज्ञकम् ॥ ४ ॥

ब्रह्महत्यादिपापघ्नमिति वेदविदो विदुः ।
श्रीराम राम रामेति ये वदन्त्यपि पापिनः ॥ ५ ॥

तेषां भुक्तिश्च मुक्तिश्च भविष्यति न संशयः ।
स्तवराजं पुरा प्रोक्तं नारदेन महात्मना ॥ ६ ॥

तत्सर्वं संप्रवक्ष्यामि हरिध्यानपुरःसरम् ।
तापत्रयाग्निशमनं सर्वपापनिकृन्तनम् ॥ ७ ॥

दारिद्र्यदुःखशमनं सर्वसम्पत्प्रदायकम् ।
विज्ञानविमलं दिव्यं मोक्षैकफलसाधनम् ॥ ८ ॥

नमस्कृत्वा प्रवक्ष्यामि रामं कृष्णमनामयम् ।
अयोध्यानगरे रम्ये रत्नमण्डपमध्यमे ॥ ९ ॥

स्थिरे कल्पतरोर्मूले रत्नसिंहासनं शुभम् ।
तन्मध्येऽष्टदलं पद्मं नानारत्नसुशोभितम् ॥ १० ॥

स्मरेद्दाशरथिं मध्ये सहस्रादित्यतेजसम् ।
पितुरङ्कगतं राममिन्द्रनीलमणिप्रभम् ॥ ११ ॥

कोमलाङ्गं विशालाक्षं विद्युद्वर्णाम्बरावृतम् ।
भानुकोटिप्रतीकाशं किरीटेन विराजितम् ॥ १२ ॥

रत्नग्रैवेयकेयूरहारकुण्डलमण्डितम् ।
रत्नकिङ्किणिमञ्जीरकटिसूत्रैरलंकृतम् ॥ १३ ॥

श्रीवत्सकौस्तुभोरस्कं वनमालाविराजितम् ।
दिव्यरत्नसमायुक्तं मुद्रिकाद्यैरलंकृतम् ॥ १४ ॥

कर्पूरागरुकस्तूरीदिव्यगन्धानुलेपनम् ।
तुलसीकुन्दमन्दारपुष्पमाल्यैरलंकृतम् ॥ १५ ॥

राघवं द्विभुजं बालं राममीषत्स्मिताननम् ।
योगशास्त्रेष्वभिरतं योगीशं योगधारिणम् ॥ १६ ॥

सदा भरतसौमित्रिशत्रुघ्नपरिसेवितम् ।
मुनिभिः सनकाद्यैश्च योगिवृन्दैश्च सेवितम् ॥ १७ ॥

वीरं रघुवरं शान्तं धनुर्वेदविशारदम् ।
मङ्गलायतनं देवं रामं राजीवलोचनम् ॥ १८ ॥

सर्वशास्त्रार्थतत्त्वज्ञमानन्दरससुन्दरम् ।
कौसल्यातनयं रामं धनुर्बाणधरं हरिम् ॥ १९ ॥

एवं सञ्चिन्तयेद्रामं यज्ज्योतिर्ज्योतिषां परम् ।
प्रहृष्टमानसो भूत्वा मुनिवर्यः स नारदः ॥ २० ॥

सर्वलोकहितार्थाय तुष्टाव रघुनन्दनम् ।
कृताञ्जलिपुटो भूत्वा चिन्तयेद्दद्भुतं हरिम् ॥ २१ ॥

एवं सञ्चिन्तयेद्रामं यज्ज्योतिरमलं शुभम् ।
यदेकं यत्परं नित्यं यदानन्दचिदात्मकम् ।
तदेकं व्यापकं लोके तद्रूपं चिन्तयाम्यहम् ॥ २२ ॥

विज्ञानहेतुं विमलायताक्षं प्रज्ञानसंदीप्यसुखैकहेतुम् [रूपम्] ।

श्रीरामचन्द्रं हरिमादिदेवं परात्परं राममहं भजामि ॥ २३ ॥
कविं पुराणं पुरुषं पुरस्तात्परात्परं योगिनमीशितारम् ।
अणोरणीयांसमनन्तवीर्यं प्राणेश्वरं राममसौ ददर्श ॥ २४ ॥

नारद उवाच—

नारायणं जगन्नाथमभिरामं जगत्पतिम् ।
कविं पुराणं वागीशं रामं दशरथात्मजम् ॥ २५ ॥

राजराजं रघुवरं कौसल्यानन्दवर्धनम् ।
भर्गं वरेण्यं विश्वेयं रघुनाथं जगद्गुरुम् ॥ २६ ॥

सत्यं सत्यप्रियं श्रेष्ठं जानकीवल्लभं विभुम् ।
सौमित्रिपूर्वजं शान्तं कामदं कमलेक्षणम् ॥ २७ ॥

आदित्यं रविमीशानं घृणिं सूर्यमनामयम् ।
आनन्दरूपिणं सौम्यं राघवं करुणानिधिम् ॥ २८ ॥

जामदग्निं तपोमूर्तिं रामं परशुधारिणम् ।
वाक्पतिं वरदं वाच्यं श्रीपतिं पुरुषोत्तमम् ॥ २९ ॥

श्रीशार्ङ्गधारिणं देवं चिन्मयानन्दविग्रहम् ।
हलधृग्विष्णुमीशानं बलरामं कृपानिधिम् ॥ ३० ॥

श्रीवल्लभं कलानाथं जगन्मोहनमच्युतम् ।
मत्स्यकूर्मवराहादिरूपधारिणमव्ययम् ॥ ३१ ॥

वामदेवं जगद्योनिमनादिनिधनं हरिम् ।
गोविन्दं गोपतिं कृष्णं गोपीजनमनोहरम् ॥ ३२ ॥

गोपालं गोमतीवासं गोपकन्यासमावृतम् ।
विद्युत्पुञ्जप्रतीकाशं रामं कृष्णमनामयम् ॥ ३३ ॥

गोगोपिकासमासीनं वेणुनादनतत्परम् ।
कामरूपं कलावन्तं कामिनं कामदं विभुम् ॥ ३४ ॥

मन्मथं मधुरानाथं माधवं मकरध्वजम् ।
श्रीधरं श्रीकरं श्रेयः श्रीनिवासं परात्परम् ॥ ३५ ॥

भूतेशं भूरिदं भद्रं भूतिदं भूतिभूषणम् ।
सर्वदुःखहरं देवं दुष्टदानववैरिणम् ॥ ३६ ॥

श्रीनृसिंहं महाविष्णुं महसा दीप्ततेजसम् ।
चिदानन्दमयं रामं प्रणवज्योतिरात्मकम् ॥ ३७ ॥

आदित्यमण्डलगतं (निश्चिता)[सच्चिदा]त्मस्वरूपिणम् ।
भक्तप्रियं पद्मनेत्रं भक्तानामीप्सितप्रदम् ॥ ३८ ॥

कौसलेयं कलानाथं काकुत्स्थं कमलाप्रभुम् ।
सिंहासने समासीनं सत्यव्रतमकल्मषम् ॥ ३९ ॥

विश्वामित्रप्रियं दान्तं स्वदारनियतव्रतम् ।
यज्ञेशं यज्ञपुरुषं यज्ञपालनतत्परम् ॥ ४० ॥

वालिप्रमथनं वीरं सुग्रीवेप्सितराज्यदम् ।
नरवानरदेवैश्च सेवितं हनुमत्प्रियम् ॥ ४१ ॥

सत्यसन्धं जितक्रोधं शरणागतवत्सलम् ।
सर्वक्लेशापहरणं विभीषणवरप्रदम् ॥ ४२ ॥

दशग्रीवहरं रौद्रं केशवं केशिमर्दनम् ।
शुद्धं सूक्ष्मं परं शान्तं तारकब्रह्मसंज्ञितम् ॥ ४३ ॥

सर्वभूतात्मभूतस्थं सर्वाधारं सनातनम् ।
सर्वकारणकर्तारं निदानं प्रकृतेः परम् ॥ ४४ ॥

निरामयं निराभासं विरवद्यं निरञ्जनम् ।
नित्यानन्दं निराकारमद्वैतं तमसः परम् ॥ ४५ ॥

परात्परतरं नित्यं सत्यानन्दं चिदात्मकम् ।
मनसा शिरसा नित्यं प्रणमामि रघूत्तमम् ॥ ४६ ॥

वेदान्तवेद्यं कविमीशितार-
मनादिमध्यान्तविहीनमाद्यम् ।
अगोचरं निर्मलमेकरूपं
नमामि रामं तमसः परस्तात् ॥ ४७ ॥

विभूतिदं विश्वसृजं विरामं
राजेन्द्रमीशं रघुवंशनाथम् ।

अचिन्त्यमव्यक्तमचिन्त्यरूपं
भजामि रामं तमसः परस्तात् ॥ ४८ ॥

तत्त्वस्य रूपं पुरुषं पुराणं
स्वतेजसा पूरितलोकनाथम् ।
राजाधिराजं रविमण्डलस्थं
विश्वेश्वरं राममहं भजामि ॥ ४९ ॥

मुनीन्द्रगुह्यं परिपूर्णमेकं
कलानिधिं कल्मषनाशहेतुम् ।
परात्परं तत्परमं पवित्रं
नमामि नित्यं महतो महान्तम् ॥ ५० ॥

अनेकवेदात्मकमादिसंज्ञ-
माद्यं हरिं राममनन्तमूर्तिम् ।
अपारसच्चित्सुखमेकरूपं
नमामि रामं महतो महान्तम् ॥ ५१ ॥

अशेषसंसारविकारहीन-
मानन्दसम्पूर्णमुखाभिरामम् ।
समस्तसाक्षि[क्ष्यं]तमसः परस्ता-
न्नारायणं विष्णुमहं नमामि ॥ ५२ ॥

ब्रह्मा विष्णुश्च रुद्रश्च देवेन्द्रो देवतास्तथा ।
रुद्रादित्याश्च वसवः साध्याश्च मुनिपुङ्गवाः ॥ ५३ ॥

विप्रा वेदास्तपो यज्ञाः पुराणं धर्मसंस्थिताः ।
वर्णाश्रमास्तथा धर्मा धर्मा वर्णाश्रमास्तथा ॥ ५४ ॥

नागा यक्षाश्च गन्धर्वा दिक्पाला दिग्गजा दिशाः ।
आदित्यादिग्रह[हा]श्चैव त्वमेव रघुपुङ्गव ॥ ५५ ॥

सप्त द्वीपाः समुद्राश्च नगा नद्यस्तथा द्रुमाः ।
स्थावरं जङ्गमं चैव त्वमेव पुरुषोत्तम ॥ ५६ ॥

देवतिर्यङ्मनुष्याणां दानवानां तथैव च ।
माता पिता तथा भर्ता त्वमेव रघुनन्दन ॥ ५७ ॥

शान्तं सर्वगतं सूक्ष्मं परब्रह्मस्वरूपिणम् ।
राजीवलोचनं रामं प्रणमामि जगत्पतिम् ॥ ५८ ॥

ततः प्रसन्नः श्रीरामः प्रोवाच मुनिपुङ्गवम् ।
तुष्टोऽस्मि मुनिशार्दूल वृणीष्व वरमुत्तमम् ॥ ५९ ॥

श्रीनारद उवाच—

यदि तुष्टोऽसि सर्वज्ञ श्रीराम करुणानिधे ।
त्वन्मूर्तिदर्शनादेव कृतार्थोऽस्मि किमीप्सितम् ॥ ६० ॥

धन्योऽहं कृतकृत्योऽस्मि पुण्योऽहं पुरुषोत्तम ।
अद्य मे सफलं जन्म जीवितं च सुजीवितम् ॥ ६१ ॥

अद्य मे सफलं सर्वमद्य मे सफलं तपः ।
अद्य मे सफलं ज्ञानं त्वत्पदाम्भोजदर्शनात् ॥ ६२ ॥

अद्वैतं विमलं ज्ञानं त्वन्नामस्मरणं तथा ।
त्वत्पदाम्भोजसद्भक्तिं देहि मे रघुनन्दन ॥ ६३ ॥

श्रीराम उवाच—

ततः परमसुप्रीतो रामः प्राह सनातनः ।
मुनिवर्य महाभाग पुनरिष्टं ददामि ते ॥ ६४ ॥

श्रीनारद उवाच—

वरं न याचे रघुनाथ युष्म-
त्पादाब्जभक्तिः सततं ममास्तु ।
इमं प्रियं राम वरं प्रयच्छ
पुनः पुनस्त्वामिदमेव याचे ॥ ६५ ॥

इत्येवमुदितो रामः प्रादात्तस्मै वरत्रयम् ।
सर्वसौभाग्यसम्पत्तिदायकं मुक्तिदं शुभम् ॥ ६६ ॥

इति श्रीरघुनाथस्य स्तवराजं महोत्तमम् ।
ब्रह्मपुत्रेण कथितं वेदानां सारमुत्तमम् ॥ ६७ ॥

गुह्याद्गुह्यतमं राजंस्तव स्नेहात् प्रकीर्तितम् ।
यः पठेच्छृणुयाद्वापि त्रिसन्ध्यं श्रद्धयान्वितः ॥ ६८ ॥

ब्रह्महत्यादिपापानि तत्समानि बहूनि च ।
सुवर्णस्तेयपापानि तत्समानि बहूनि च ॥ ६९ ॥

सुवर्णस्तेयपापानि (गुरुतल्पायुतानि) [तत्समानि बहूनि] च ।
सर्वपापैः प्रमुच्यन्ते कल्पायुतशतोद्भवैः ॥ ७० ॥

वाचिकं मानसं पापं कर्मणा समुपार्जितम् ।
श्रीरामस्मरणेनैव व्यपोहतु न संशयः ॥ ७१ ॥

गीतानामसहस्रे द्वे स्तवराजो ह्यनुस्मृतः ।
यस्य कुक्षौ तु वर्तन्ते स वै नारायणः स्मृतः ॥ ७२ ॥

श्रीरामचन्द्र रघुपुङ्गव राजवर्य
राजेन्द्र राम रघुनायक राघवेश ।
राजाधिराज रघुनन्दन राघवेश
दासोऽहमद्य भवतः शरणं गतोऽस्मि ॥ ७३ ॥

श्रीरामरामरामेति रमे रामे मनोरमे ।
सहस्रनाम तत्तुल्यं रामनाम वरानने ॥ ७४ ॥

इदं सत्यमिदं सत्यं सत्यं नैवातिरिच्यते ।
राघवश्च परब्रह्म रामान्न किञ्चिन्न विद्यते ॥ ७५ ॥

तस्माद्रामस्वरूपं हि सत्यं सत्यमिदं जगत् ।
रामाय रामभद्राय रामचद्राय वेधसे ॥ ७६ ॥

रघुनाथाय नाथाय सीतायाः पतये नमः ।
श्रीरामचन्द्रचरणसरोरुहाभ्यां नमः ॥ ७७ ॥

॥ इति श्रीहिरण्यगर्भसंहितायां ब्रह्मनारदसंवादे
श्रीरघुनाथस्तवराजः सम्पूर्णः ॥

---

५. ॥ अथ श्रीरामतारावलिः ॥

तारकं ताटकारातिं तापत्रयनिवारकम् ।
तत्स्वरूपच्चिदानन्दं रामं वन्दे जगद्गुरुम् ॥ १ ॥

सर्वज्ञं सर्वदेवेशं सनकादिभिरर्चितम् ।
सनातनतमं देवं रामं वन्दे जगद्गुरुम् ॥ २ ॥

विश्वरूपं विश्वधरं विश्वव्यापिनमव्ययम् ।
विश्वोत्पत्तिस्थानभूतं रामं वन्दे जगद्गुरुम् ॥ ३ ॥

तुषाराद्रिसुतावन्द्यं तृणीकृतदशाननम् ।
तुलारहितरूपाढ्यं रामं वन्दे जगद्गुरुम् ॥ ४ ॥

वरदं वासुदेवाख्यं वाल्मीकिविनुतं हरिम् ।
वंशीरवानुरक्तं च रामं वन्दे जगद्गुरुम् ॥ ५ ॥

रेवतीरमणं शान्तं राकाचन्द्रनिभाननम् ।
राक्षसान्तकरं रम्यं रामं वन्दे जगद्गुरुम् ॥ ६ ॥

निर्मलं निगमाकारं नीलजीमूतसंनिभम् ।
नित्यानन्दं निराभासं रामं वन्दे जगद्गुरुम् ॥ ७ ॥

यज्ञेशं यज्ञभोक्तारं यज्ञपुण्यफलप्रदम् ।
यक्षराक्षसभेत्तारं रामं वन्दे जगद्गुरुम् ॥ ८ ॥

भर्गधर्मप्रभेत्तारं भक्तानामभयप्रदम् ।
भक्तहृद्गेहवासिनं[संवासं] रामं वन्दे जगद्गुरुम् ॥ ९ ॥

गोधनं क्रोधरहितं गोपीजनमनोहरम् ।
गोधवार्चितपादाब्जं रामं वन्दे जगद्गुरुम् ॥ १० ॥

देवेशं देवतावन्द्यं देवान्तकनिपूदनम् ।
बाधनातीतममलं रामं वन्दे जगद्गुरुम् ॥ ११ ॥

वराहरूपं वागीशं वामनाकारमच्युतम् ।
स्नेहीकृतहनूमन्तं रामं वन्दे जगद्गुरुम् ॥ १२ ॥

सर्वज्ञं सर्वदेवेशं सर्वभूतहिते रतम् ।
सर्वयज्ञाधिपं सर्वं रामं वन्दे जगद्गुरुम् ॥ १३ ॥

भीकृतारातिनिकरं प्रकृतेः परमव्ययम् ।
प्रव्यक्तममलं भव्यं रामं वन्दे जगद्गुरुम् ॥ १४ ॥

मायातीतं मौनिगम्यं माधवं मत्स्यरूपिणम् ।
मारीचमदहन्तारं रामं वन्दे जगद्गुरुम् ॥ १५ ॥

हिरण्यवर्णं सीताभिरामावामाङ्कसंस्थितम् ।
शरण्यं सर्वलोकानां रामं वन्दे जगद्गुरुम् ॥ १६ ॥

धीरं नीरधिगम्भीरं शूरं शत्रुनिबर्हणम् ।
मारकोटिशुभाकारं रामं वन्दे जगद्गुरुम् ॥ १७ ॥

ईषाशेषमृषाशेषक्रायिनं बहुमायिनम् ।
पोषिताशेषदीनौघं रामं वन्दे जगद्गुरुम् ॥ १८ ॥

नतार्तिशममानन्दमव्ययं चित्स्वरूपिणम् ।
अव्यक्तममलं भव्यं रामं वन्दे जगद्गुरुम् ॥ १९ ॥

प्रव्यक्तममलं शान्तं मध्यमं चित्स्वरूपिणम् ।
अव्यक्तमभिभेत्तारं रामं वन्दे जगद्गुरुम् ॥ २० ॥

चोदितं वेदनिकरैर्नादबिन्दुकलात्मकम् ।
आधारं सर्वभूतानां रामं वन्दे जगद्गुरुम् ॥ २१ ॥

दयासिन्धुं सुमनसां हृदयानन्दचन्दिरम् ।
सदानन्दकरं विष्णुं रामं वन्दे जगद्गुरुम् ॥ २२ ॥

यो गतिः सर्वभूतानां योगदानादिकर्मिणाम् ।
योगमायाधारभूतं रामं वन्दे जगद्गुरुम् ॥ २३ ॥

रामतारावलीमेनां प्रत्यहं यः पठेन्नरः ।
स गच्छेद्रामसायुज्यं न पुनर्लभतेऽसुखम् [जनिम्] ॥ २४ ॥

॥ इति श्रीरामतारावलिः सम्पूर्णा ॥

---

६. ॥ अथ श्रीरामब्रह्मस्तुतिः ॥

ततो हि दुर्मना रामः श्रुत्वैव वदतां गिरः ।
दध्यौ मुहूर्तं धर्मात्मा बाष्पव्याकुललोचनः ॥ १ ॥

ततो वैश्रवणो राजा यमश्चामित्रकर्शनः ।
सहस्राक्षो महेन्द्रश्च वरुणश्च परंतपः ॥ २ ॥

षडर्धनयनः श्रीमान् महादेवो वृषध्वजः ।
कर्ता सर्वस्य लोकस्य ब्रह्मा ब्रह्मविदां वरः ॥ ३ ॥

एते सर्वे समागम्य विमानैः सूर्यसन्निभैः ।
आगम्य नगरीं लङ्कामभिजग्मुश्च राघवम् ॥ ४ ॥

ततः सहस्ताभरणान् प्रगृह्य विपुलान् भुजान् ।
अब्रुवंस्त्रिदशश्रेष्ठा राघवं प्राञ्जलिं स्थितम् ॥ ५ ॥

कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानवतां प्रभुः [वरः] ।
उपेक्षसे कथं सीतां पतन्तीं हव्यवाहने ॥ ६ ॥

कथं देवगणश्रेष्ठमात्मानं नावबुध्यसे ।
ऋतधामा वसुः पूर्वं वसूनां त्वं प्रजापतिः ॥ ७ ॥

त्वं त्रयाणां हि लोकानामादिकर्ता स्वयंप्रभुः ।
रुद्राणामष्टमो रुद्रः साध्यानामपि [सि]पञ्चमः ॥ ८ ॥

अश्विनौ चापि ते कर्णौ चन्द्रसूर्यौ च चक्षुषी ।
अन्ते चादौ च लोकानां दृश्यसे त्वं परंतप ॥ ९ ॥

उपेक्षसे च वैदेहीं मानुषः प्राकृतो यथा ।
इत्युक्तो लोकपालैस्तैः स्वामी लोकस्य राघवः ॥ १० ॥

अब्रवीत् त्रिदशश्रेष्ठान् रामो धर्मभृतां वरः ।
आत्मानं मानुषं मन्ये रामं दशरथात्मजम् ॥ ११ ॥

योऽहं यस्य यतश्चाहं भगवान् प्र[तत्]ब्रवीतु मे ।
इति ब्रुवाणं काकुत्स्थं ब्रह्मा लोकपितामहः ॥ १२ ॥

अब्रवीच्छृणु मे राम सत्यं सत्यपराक्रम ।
भवान्नारायणो देवः श्रीमांश्चक्रधरो हरिः ॥ १३ ॥

एकशृङ्गो वराहस्त्वं भूतभव्यसपत्नजित् ।
अक्षरं ब्रह्म सत्त्वं त्वं [सत्यं च]त्वं मध्येऽन्ते च राघव ॥ १४ ॥

लोकानां त्वं परो धर्मो विष्वक्सेनश्चतुर्भुजः ।
शार्ङ्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तमः ॥ १५ ॥

अजितः खड्गभृद्विष्णुः कृष्णश्चैव बृहद्बलः ।
सेनानीर्ग्रामणीश्च त्वं त्वं बुद्धिस्त्वं क्षमा दया ॥ १६ ॥

प्रभवश्चाप्ययश्च त्वमुपेन्द्रो मधुसूदनः ।
इन्द्रकर्मा महेन्द्रस्त्वं पद्मनाभो [1]रथाङ्गभृत् ॥ १७ ॥

शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः ।
सहस्रशृङ्गो वेदात्मा शतजिह्वो महर्षभः ॥ १८ ॥

त्वं त्रयाणां हि लोकानामादिकर्ता स्वयंप्रभुः ।
सिद्धानामपि साध्यानामाश्रयश्चासि पूर्वजः ॥ १९ ॥

त्वं यज्ञस्त्वं वषट्कारस्त्वमोंकारः परंतप ।
प्रभवं निधनं वा ते न विदुः को भवानिति ॥ २० ॥

दृश्यसे सर्वभूतेषु ब्राह्मणेषु च गोषु च ।
दिक्षु सर्वासु गगने पर्वतेषु वनेषु च ॥ २१ ॥

सहस्रचरणः श्रीमान् शतशीर्षः सहस्रदृक् ।
त्वं धारयसि भूतानि वसुधां च सपर्वताम् ॥ २२ ॥

---

1. रणान्तकृत्

अन्ते पृथिव्याः सलिले दृश्यसे त्वं महोरगैः ।
त्रीन् लोकान् धारयन् राम देवगन्धर्वदानवान् ॥ २३ ॥

अहं ते हृदयं राम जिह्वा देवी सरस्वती ।
देवा गात्रेषु रोमाणि निर्मिता ब्रह्मणा प्रभो ॥ २४ ॥

निमेषस्तेऽभवद्रात्रिरुन्मेषस्तेऽभवद्दिवा ।
संस्कारास्तेऽभवन् वेदा न तदस्ति त्वया विना ॥ २५ ॥

जगत्सर्वं शरीरं ते स्थैर्यं ते वसुधातलम् ।
अग्निः कोपः प्रसादस्ते सोमः श्रीवत्सलक्षण ॥ २६ ॥

त्वया लोकाः समाक्रान्ताः [1]पुराणे विक्रमैस्त्रिभिः ।
महेन्द्रश्च कृतो राजा बलिं बद्ध्वा महासुरम् ॥ २७ ॥

सीता लक्ष्मीर्भवान् विष्णुर्देवः कृष्णः प्रजापतिः ।
वधार्थं रावणस्येह प्रविष्टो मानुषीं तनुम् ॥ २८ ॥

तदिदं नः कृतं कार्यं त्वया धर्मभृतां वर ।
निहतो रावणो राम [2]प्रविष्टो दिवमाक्रम ॥ २९ ॥

अमोघं बलवीर्यं ते न ते मोघः पराक्रमः ।
अमोघं दर्शनं राम न च मोघस्तव स्तवः ॥ ३० ॥

अमोघास्ते भविष्यन्ति भक्तिमन्तस्तु ये जनाः ।
ये त्वां देव ध्रुवं प्राप्ताः पुराणपुरुषोत्तमम् ॥ ३१ ॥

प्राप्नुवन्ति सदा कामानिह लोके परत्र च ।
इममार्षं स्तवं नित्यमितिहासं पुरातनम् ।
ये नराः कीर्तयिष्यन्ति नास्ति तेषां पराभवः ॥ ३२ ॥

॥ इति श्रीब्रह्मस्तुतिः सम्पूर्णा ॥

---

1. पुरा स्वैः
2. प्रहृष्टो

७. ॥ अथ श्रीरामरत्नदशकम् ॥

वेणुनादलोलबालगोपिकाकदम्बकं
लीलयोद्धृतैकशैलगुप्तगोकदम्बकम् ।
कामरूपकेलिलोलभूविलासिनीपतिं
राम राम राम रामनाम जल्प तारकम् ॥ १ ॥

राजराजमौलिरत्नराजिताङ्घ्रिपङ्कजं
राजराजसोदरोच्छिरःसरोजभञ्जनम् ।
रामशब्दगीतयुक्तयोगिमुक्तिदायकं
राम राम राम रामनाम जल्प तारकम् ॥ २ ॥

जानकीमनःसरोजराजहंसविभ्रमं
पारिजातजातदेववन्दितोरुविक्रमम् ।
पादपद्मरेणुधौतगौतमाङ्गनार्चितं
राम राम राम रामनाम जल्प तारकम् ॥ ३ ॥

दूषणादिराक्षसेन्द्रदन्तिकेसरीश्वरं
सप्तसालभेदकृत्यदक्षदिव्यसायकम् ।
कामितप्रदानदक्षकल्पवृक्षरूपिणं
राम राम राम रामनाम जल्प तारकम् ॥ ४ ॥

शङ्करादिगीयमानपुण्यनामकीर्तनं
भानुकोटिकान्तिकान्तरत्नशेखराञ्चितम् ।
सामगानलोलचित्तभक्तलोकनायकं
राम राम राम राम नाम जल्प तारकम् ॥ ५ ॥

जातयातुधाननाशकारिकार्मुकोज्ज्वलं
पादरेणुलेशधौतगौतमप्रियानुतम् ।
जानकीविलासलोलमानसं कृपानिधिं
राम राम राम रामनाम जल्प तारकम् ॥ ६ ॥

भनुवंशवार्धिचन्द्रमिन्द्रनीलसुन्दरं
भारतीविलासनृत्तमण्टपा[युता]ननम् ।
बालभानुकोटितुल्यपीतवस्त्रसंवृतं
राम राम राम रामनाम जल्प तारकम् ॥ ७ ॥

वारिजातपारिजातसूनशोभिकन्धरं
हारिहारशोभमानबाहुमध्यसुन्दरम् ।
कामदेव[देह]कान्तिपूरसोदराङ्गवैभवं
राम राम राम रामनाम जल्प तारकम् ॥ ८ ॥

भोगिराजभोगपीनबाहुदण्डमण्डितं
राजराजसोदरास्यपद्मशीतदीधितम् ।
वालिसूनुशोकदानधीरधीरविक्रमं
राम राम राम रामनाम जल्प तारकम् ॥ ९ ॥

नारदादियोगिवृन्दवन्द्यपादपङ्कजं
वारिदावलीनिकाशकायकान्तिसुन्दरम् ।
शारदारविन्दरविन्दपत्ररम्यदीर्घलोचनं
राम राम राम रामनाम जल्प तारकम् ॥ १० ॥

पापितापजातभेदकारणं गुणान्वितं
रामदिव्यनामयुक्तवृत्तपञ्चकद्वयम् ।
भुक्तिमुक्तिदानबद्धचित्तवृत्तिमन्वहं
वक्ति यः शृणोति सोऽपि वाञ्छितं समीहते ॥ ११ ॥

॥ इति श्रीरामरत्नदशकं सम्पूर्णम् ॥

---

८. ॥ अथ श्रीराघवाष्टकम् ॥

कमललोचनौ काञ्चनाम्बरौ
कवचभूषणौ कार्मुकान्वितौ ।
कलुषसंहरौ कामितप्रदौ
रहसि नौमि तौ रामलक्ष्मणौ ॥ १ ॥

धृतशिखण्डिनौ दीनरक्षकौ
धृतिहिमाचलौ दिव्यविग्रहौ ।
दिविजपूजितौ दीर्घदोर्युगौ
रहसि नौमि तौ रामलक्ष्मणौ ॥ २ ॥

पवनजानुगौ पादचारिणौ
पटुशिलीमुखौ पावनाङ्घ्रिकौ ।
परमसात्त्विकौ भक्तवत्सलौ
रहसि नौमि तौ रामलक्ष्मणौ ॥ ३ ॥

वनविहारिणौ वल्कलाम्बरौ
वनफलाशिनौ वासवस्तुतौ ।
वरगुणाकरौ वानरार्चितौ
रहसि नौमि तौ रामलक्ष्मणौ ॥ ४ ॥

घनतटिन्निभौ खड्गधारिणौ
घनजटाम्बरौ खण्डितव्यथौ ।
करशिलीमुखौ खरकरप्रभौ
रहसि नौमि तौ रामलक्ष्मणौ ॥ ५ ॥

सवनरक्षकौ सत्यसङ्गरौ
समरभीकरौ साहसान्वितौ ।
सदयमानसौ सर्वपूजितौ
रहसि नौमि तौ रामलक्ष्मणौ ॥ ६ ॥

मकरकुण्डलौ मौनिसेवितौ
मनुकिरीटिनौ मानुषोत्तमौ ।
मनुकुलेश्वरौ मञ्जुभाषिणौ
रहसि नौमि तौ रामलक्ष्मणौ ॥ ७ ॥

वरगुणास्पदं राघवाष्टकं
रहसि यः पठेद्रामभक्तिदम् ।
रहितकल्मषं रामसन्निधौ
रविसमप्रभो राजते सदा ॥ ८ ॥

॥ इति श्रीराघवाष्टकं सम्पूर्णम् ॥

---

९. ॥ अथ श्रीरामविश्वरूपस्तवः ॥

सूत उवाच—

ततो बदरिकारण्यं पुण्यं प्राप्य सुधर्मधीः ।
व्यासं मुनिवरश्रेष्ठं नत्वा भीष्मोऽब्रवीद्वचः ॥ १ ॥

श्रीभीष्मः—

मया मुनिवरश्रेष्ठ विश्रुता हि सहस्रशः ।
गणेशशक्तिसूर्येशचक्रिणां स्तुतयोऽमलाः ॥ २ ॥

तेषु स्तोत्रेषु किं श्रेष्ठं ब्रूहि मे तन्मुनीश्वर ।

श्रीव्यासः—

त्वया निर्दिष्टदेवानां स्तौत्रेषु च परं वरम् ॥ ३ ॥

कोटिकोटिगुणाधिक्यं ब्रह्मणा कथितं पुरा ।
वैष्णवस्तोत्रवर्येषु सर्वेष्वपि नदीसुत ॥ ४ ॥

अनन्तपुण्यफलदा रामस्येयं महास्तुतिः ।
तामहं संप्रवक्ष्यामि शृणु भीष्म शुचिव्रत ॥ ५ ॥

सर्वपापप्रशमनीं मानसेप्सितदायिनीम् ।
निहत्य रावणं सङ्ख्ये त्रिलोकीजनदुर्जयम् ॥ ६ ॥

महामोहमिवोद्रिक्तं ब्रह्मदत्तमहावरम् ।
रामः परमधर्मात्मा मायामानुषविग्रहः ॥ ७ ॥

अयोध्यानगरीं प्राप्तो वृत्रहेवामरावतीम् ।
अथ तस्मिन् दिने पुण्ये शुभलग्ने शुभान्विते ॥ ८ ॥

राघवस्याभिषेकार्थं मङ्गलं चक्रिरे जनाः ।
वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः ॥ ९ ॥

मार्कण्डेयश्च मौद्गल्यः पर्वतो नारदस्तथा ।
एते महर्षयस्तत्र जपहोमपुरस्सरम् ॥ १० ॥

अभिषेकं शुभं चक्रुः श्रीरामं रघुसत्तमम् ।
नानारत्नमये दिव्ये हेमपीठे शुभान्विते ॥ ११ ॥

निवेश्य सीतया तस्मिन् जनार्दनमिव श्रिया ।
सौवर्णकलशैर्दिव्यैर्नानारत्नमयैः शुभैः ॥ १२ ॥

सर्वतीर्थोदकैः पुण्यैर्मङ्गलद्रव्यसंयुतैः ।
दूर्वाग्रतुलसीपत्रगन्धपुष्पसमन्वितैः ॥ १३ ॥

मन्त्रपूतजलैः शुभ्रैर्मुनयः संशितव्रताः ।
जपन्तो वैष्णवान् मन्त्रांश्चतुर्वेदमयान् शुभान् ॥ १४ ॥

अभिषेकं शुभं चक्रुः काकुत्स्थं जगतां पतिम् ।
तस्मिन् शुभतरे लग्ने देवदुन्दुभयो दिवि ॥ १५ ॥

निनेदुः पुष्पवर्षाणि ववृषुश्च समन्ततः ।
दिव्याम्बरैर्भूषणैश्च दिव्यगन्धानुलेपनैः ॥ १६ ॥

पुष्पैर्नानाविधैर्दिव्यैर्देव्या सह रघूद्वहम् ।
अलंकृतः स शुशुभे मुनिभिर्वेदपारगैः ॥ १७ ॥

छत्रं च चामरं दिव्यं धृतवाँल्लक्ष्मणस्तदा ।
पार्श्वे भरतशत्रुघ्नौ तालवृन्तौ विवेजतुः ॥ १८ ॥

दर्पणं प्रददौ श्रीमान् राक्षसेन्द्रो विभीषणः ।
दधार पूर्णकलशं सुग्रीवो वानरेश्वरः ॥ १९ ॥

जाम्बवांश्च महातेजाः पुष्पमालां मनोरमाम् ।
वालिपुत्रस्तु ताम्बूलं सकर्पूरं ददौ प्रियात् ॥ २० ॥

हनुमान् दीपिकां दिव्यां सुषेणस्तु ध्वजं शुभम् ।
परिवार्य महात्मानं मन्त्रिणःसमुपासिरे ॥ २१ ॥

धृष्टिर्जयन्तो विजयः सुराष्ट्रो राष्ट्रवर्धनः ।
अकोपो धर्मपालश्च सुमन्त्रश्चाष्टमः स्मृतः ॥ २२ ॥

राजानश्च नरव्याघ्रा नानाजनपदेश्वराः ।
पौराश्च नैगमा वृद्धा राजानः पर्युपासते ॥ २३ ॥

ऋक्षैश्च वानरेन्द्रैश्च मन्त्रिभिः पृथिवीश्वरैः ।
राक्षसैर्द्विजमुख्यैश्च किंकरैश्च समन्वितः ॥ २४ ॥

परव्योम्नि यथा नित्यैर्देवतैः कमलापतिः ।
तथा नृपवरः श्रीमान् साकेते शुशुभे सदा ॥ २५ ॥

इन्दीवरदलश्यामं पद्मपत्रनिभेक्षणम् ।
आजानुबाहुं काकुत्स्थं पीतवस्त्रधरं हरिम् ॥ २६ ॥

कम्बुग्रीवं महोरस्कं विचित्राभरणैर्युतम् ।
देव्या सह समासीनमभिषिक्तं रघूत्तमम् ॥ २७ ॥

विमानस्थाः सुरगणा हर्षनिर्भरमानसाः ।
तुष्टुवुर्जयशब्दैश्च गन्धर्वाप्सरसां गणाः ॥ २८ ॥

अभिषिक्तस्तदा रामो वसिष्ठाद्यैः समन्त्रिभिः ।
शुशुभे सीतया देव्या नारायण इव श्रिया ॥ २९ ॥

अत्यमर्त्यतया रूपमुपमातीतमुज्ज्वलम् ।
दृष्ट्वा तुष्टाव हृष्टात्मा शंकरो द्रष्टुमागतः ॥ ३० ॥

कृताञ्जलिपुटो भूत्वा सानन्दो गद्गदाकुलः ।
हर्षयन् सकलान् देवान् मुनीनपि च मानवान् ॥ ३१ ॥

रुद्रः—

नमो मूलप्रकृतये नित्याय परमात्मने ।
सच्चिदानन्दरूपाय विश्वरूपाय वेधसे ॥ ३२ ॥

नमो निरन्तरानन्दमूलकन्दाय विष्णवे ।
जगत्त्रयकृतानन्दमूर्तये दिव्यमूर्तये ॥ ३३ ॥

नमो ब्रह्मेशपूज्याय सर्वदेवमयाय च ।
नमो विष्णुस्वरूपाय सर्वरूपाय ते नमः ॥ ३४ ॥

उत्पत्तिस्थितिसंहारकारिणे त्रिगुणात्मने ।
नमोऽस्तु निर्गतोपाधिस्वरूपाय मुदात्मने ॥ ३५ ॥

अनया दिव्यया देव्या सीतयोपाधिधारिणे ।
नमः पुंप्रकृतिभ्यां च युवाभ्यां जगतां कृते ॥ ३६ ॥

जगन्मातापितृभ्यां च सीतायै राघवाय च ।
नमः प्रपञ्चरूपिण्यै निष्प्रपञ्चस्वरूपिणे ॥ ३७ ॥

नमो ध्येयस्वरूपिण्यै योगिध्येयात्मधारिणे ।
परिणामापरीणामनित्याभ्यां च नमो नमः ॥ ३८ ॥

कूटस्थबीजरूपाभ्यां जानकयै राघवाय च ।
सीता लक्ष्मीर्भवान् विष्णुः सीता गौरी भवान् शिवः ॥ ३९ ॥

सीता स्वयं हि सावित्री स्वयं ब्रह्मा चतुर्मुखः ।
सीता शची भवानिन्द्रः सीता भैमी नलो भवान् ॥ ४० ॥

सीता संहारीणी देवी यमरूपधरो भवान् ।
सीता तु मानसी देवी निर्ऋतिस्त्वं रघूत्तम ॥ ४१ ॥

सीता तु भार्गवी देवी वरुणो यादसां पतिः ।
सीता सदागतिर्देवी जगत्प्राणधरो भवान् ॥ ४२ ॥

सीता तु सर्वसम्पत्तिः कुबेरस्त्वं जगत्पते ।
सीता च देवी रुद्राणी भवान् रुद्रो महाबलः ॥ ४३ ॥

सीता तु रोहिणी देवी चन्द्रस्त्वं लोकसौख्यदः ।
सीता संज्ञा भवान् सूर्यः सीता रात्रिर्भवान् दिनम् ॥ ४४ ॥

सीता देवी महाकाली महाकालो भवान् खलु ।
स्त्रीलिङ्गं त्रिषु लोकेषु यत्तत्सर्वं हि जानकी ॥ ४५ ॥

पुंनामलाञ्छितं वस्तु यत्तत्सर्वं भवान् प्रभो ।
सर्वत्र सर्वदेहेषु सीता षट्चक्रधारिणी ॥ ४६ ॥

तथा त्वमपि च क्षान्तस्त्रीजातिर्विश्वभासिनी ।
तस्माद्विश्वमिदं प्रोक्तं युवाभ्यां परिचिह्नितम् ॥ ४७ ॥

चिह्नितं शिवशक्तिभ्यां शरीरं नान्तरा प्रभो ।
आवां राम जगत्पूज्यौ मम पूज्यौ युवां सदा ॥ ४८ ॥

त्वन्नामजापिनी गौरी त्वन्मन्त्रजपवानहम् ।
मुमुक्षोर्मणिकण्ठ्यन्धु रन्ध्रोदकनिवासिनः (?) ॥ ४९ ॥

अहं दिशामि ते मन्त्रं तारकब्रह्मवाचकम् ।
श्रीरामरामरामेतीत्येतत्तारकमुच्यते ॥ ५० ॥

अतस्त्वं जानकीनाथ परं ब्रह्मासि निश्चितम् ।
त्वन्मायामोहिताः सर्वे न त्वां जानन्ति तत्त्वतः ॥ ५१ ॥

इत्युक्तः शम्भुना रामः प्रसादप्रवणोऽभवत् ।
विश्वरूपधरः श्रीमानद्भुताकारदर्शनः ॥ ५२ ॥

तं तथारूपमालोक्य नरवानरदेवताः ।
न द्रष्टुमपि शक्तास्ते तैजसं महदद्भुतम् ॥ ५३ ॥

भयाद्वै त्रिदशश्रेष्ठाः प्रणेमुश्चातिभक्तितः ।
भीता विज्ञाय रामोऽपि नरवानरदेवताः ।
मायामानुषतां प्राप्य सर्वानेवाब्रवीद्वचः ॥ ५४ ॥

श्रीरामचन्द्रः—

शृणुध्वं देवता यो मां प्रत्यहं संस्तविष्यति ।
स्तवेन शम्भुनोक्तेन वेदतुल्येन मानवः ॥ ५५ ॥

विमुक्तः सर्वपापेभ्यो मत्सारूप्यं समश्नुते ।
रणे जयमवाप्नोति न क्वचित् परिभूयते ॥ ५६ ॥

भूतवेतालकृत्यादिग्रहैश्चापि न बाध्यते ।
अपुत्रो लभते पुत्रं पतिं विन्दति कन्यका ॥ ५७ ॥

दरिद्रः श्रियमाप्नोति स प्रभूतामनश्वराम् ।
सर्वलोकप्रियो विद्वान् सर्वभूपालपूजितः ॥ ५८ ॥

आत्मनोऽपि प्रियः स्त्रीणां जायते नात्र संशयः ।
निर्विघ्नः सर्वकार्येषु सर्वारम्भो भवेन्नरः ॥ ५९ ॥

यं यं कामयते मर्त्यः सुदुर्लभमनोरथम् ।
षण्मासात्तं तमाप्नोति स्तवस्यास्य प्रकीर्तनात् ॥ ६० ॥

सर्ववेदेषु यत्पुण्यं सर्वतीर्थवरेषु च ।
सर्वयज्ञेषु दानेषु तत्सर्वं लभते फलम् ॥ ६१ ॥

श्रीव्यासः—

इत्युक्त्वा रामचन्द्रोऽपि प्रपूज्य च महेश्वरम् ।
ब्रह्मादित्रिदशैः सर्वैर्विससर्ज समन्वितम् ॥ ६२ ॥

अर्चिता मानिताः सर्वा नरवानरदेवताः ।
विसृष्टा रामचन्द्रेण प्रीत्या परमया युताः ॥ ६३ ॥

इत्थं विसृष्टाः खलु ते च सर्वे
स्वं स्वं पदं जग्मुरतीव तुष्टाः ।
हृष्टाः पठन्तः स्तवमीश्वरोक्तं
रामं स्मरन्तो नरविश्वरूपम् ॥ ६४ ॥

॥ इति श्रीपाद्मपुराणे श्रीरामविश्वरूपसंदर्शनस्तवः सम्पूर्णः ॥

---

१०. ॥ अथ श्रीरामसप्तर्षिस्तोत्रम् ॥

काश्यपः—

नित्यं किं धावसि चलविषयाननुभवितुं सुखलेशाभासानुरुतरदुःखानति-दुःसहानत्यन्तायासानंहोमूलानुग्रभयङ्कररौरवादिनारकगतिहेतूनेतानपि परिहर सीतापतिमाशु परिचरेशं भो चेतः श्रीरामं भज शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ १ ॥

अत्रिः—

बहुविधपापवशादिह नानायोनिषु जन्ममृतिर्यो देही दैवादुत्तममानुषपूरुष-विप्रदेहविद्यासम्पन्नोऽपि ब्रह्मणि परमे विमुखो दुःखी दुर्विषयैषी नश्यति तृणकवलस्वीकरणे काले पशुरिव रोमन्थं कुर्वन् भो चेतः श्रीरामं भज शरणम् ।

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ २ ॥

भरद्वाजः—
उपर्युपरि मनोरथजालं विद्वानपि कामयते यतते पुत्रमित्रकलत्रादिषु निर्वेदं नैति कामकामी विद्यासम्पत्कुलधनसौभगयौवनगर्वपर्वताधिरूढो मूढः पश्चादन्धे तमसि पतेदवशोऽन्धोऽन्धुमिव भो चेतः श्रीरामं भज शरणं भज रघुरामं शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ३ ॥

विश्वामित्रः—
अरिषड्वर्गं जहि तृष्णामपि मायाविलसितमिदमिति बुद्ध्वा दुर्जनसङ्गतिमतिदूरीकुरु सज्जनमाश्रय भो परधनपरदाराभिरतिं त्यज पारलौकिकं धर्मं परिचिनु पद्मापतिपदपद्मं सेव(य)[स्व] बन्धविमुक्त्यै भो चेतः श्रीरामं भज शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ४ ॥

गौतमः—
कर्णाकर्णय वैदेहीवरवर्णनीयगुणवन्दितचरितं नयनालोकय नयननलिनमुखसुन्दरेन्दुबिम्बं मस्तक संस्तुतमहिमानं नम कस्तूरीनिकराकारं हस्तयुगार्चय हरिपदममलं ह्यवनीपालमिनकुलरत्नं भो चेतः श्रीरामं भज शरणं भज रघुरामं शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ५ ॥

जमदग्निः—
परापवादं परिहर जिह्वे पारुष्यं चानृतमपि मा वद सङ्कीर्तय केशव नारायण दामोदर कृष्ण नरहरे वैकुण्ठाधिप लक्ष्मीवल्लभ बुधजनमानसमन्दिर सीतानायक दशरथनन्दन इति सततं भो चेतः श्रीरामं भज शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ६ ॥

वसिष्ठः—
नित्यानन्दं सत्यमनन्तं ब्रह्म परात्परमव्ययममलं नित्यं शुद्धं बुद्धं शाश्वतमप्रमेयमनाद्यन्तं सर्वासामुपनिषदामर्थोऽयं श्रीरामः सीतापतिरिति चतुराननशिवहैमवतीजपसर्वस्वं मन्त्रं भो चेतः श्रीरामं भज शरणं भज रघुरामं शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ७ ॥

एवं स्तुत्वा रामचन्द्रं मुनीन्द्राः
प्रत्येकं ते भक्तिनम्रास्तदानीम् ।
आपन्नार्तिध्वान्तभानुं प्रपन्ना-
स्तूष्णीमासन् रामपादैकनिष्ठाः ॥ ८ ॥

॥ इति श्रीरामसप्तर्षिस्तोत्रं सम्पूर्णम् ॥

---

११. ॥ अथ श्रीरामनामस्तुतिः ॥

राशब्दोच्चारणादेव मुखान्निर्यान्ति पातकाः ।
पुनः प्रवेशनभिया मशब्दस्तु कवाटवत् ॥ १ ॥

रामेति वर्णद्वयमादरेण
सदा स्मरन् मुक्तिमुपैति जन्तुः ।
कलौ युगे कल्मषमानसाना-
मन्यत्र धर्मे खलु नाधिकारः ॥ २ ॥

जानाति राम तव नामरुचिं महेशो
जानाति गौतमसती चरणप्रभावम् ।
जानाति दोर्बलपराक्रममीशचापो
जानात्यमोघपटुबाणगतिं पयोधिः ॥ ३ ॥

जानाति राम तव चित्तगतिं हनूमान्
जानाति राम तव सख्यगतिं कपीशः ।
जानाति राम तव युद्धगतिं दशास्यो
जानाति राम तव मोक्षगतिं गजेन्द्रः [खगेन्द्रः[1]] ॥ ४ ॥

पटुतरजलधीरध्वानमादाय चापं
पवनजवनमेकं बाणमाकृष्य तूणात् ।
अभयवचनदायी सानुजः सर्वतो मे
रणहतदनुजेन्द्रो रामचन्द्रः सहायः ॥ ५ ॥

॥ इति श्रीरामनामस्तुतिः सम्पूर्णा ॥

---

1. जटायुरित्यर्थः

१२. ॥ अथ श्रीरामसम्बोधनस्तोत्रम् ॥

मत्स्य कूर्म किटे मर्त्यसिंह वामन भार्गव ।
राम प्रलम्बहन् कृष्ण कल्किन्[कल्के]पाहि दशाकृते ॥ १ ॥

॥ बालकाण्डः ॥

राम दाशरथे रक्ष कौसल्यातनयाग्रज ।
भरतस्य च सौमित्र्योः क्रीडापर मनोहर ॥ २ ॥

अधीतवेदवेदाङ्गधनुर्वेद महामते ।
कौशिकार्थित तल्लब्धबलातिबल पाहि माम् ॥ ३ ॥

ताटकाताटकेयारे गाधिजाध्वररक्षक ।
पादरेणुकणत्राताहल्य कल्यो वने मम ॥ ४ ॥

माहेश्वरधनुर्भङ्गप्रीतवैदेहतत्सुत ।
गृहीतपाणे सीतायाः स्वतातस्य नियोगतः ॥ ५ ॥

जामदग्न्यनिरुद्धाध्वन् धनुषा तत्तपोहर ।
प्रविष्टायोध्य भुञ्जान मानुषान् भोगसञ्चयान् ॥ ६ ॥

बहूनृतून् भुविजया सार्धं तं मानसार्पितम् [सन्मानसार्चित] ।
श्रिया विष्णुरिवाजस्रं तया शोभित पाहि माम् ॥ ७ ॥

॥ अयोध्याकाण्डः ॥

राज्यदानसमुद्युक्तजनकासङ्ख्यसद्गुण ।
मन्थराहितरोषेण कैकेय्या विघ्नितोत्सव ॥ ८ ॥

संत्यक्तराज्य तत्प्रीत्यै वनवासमहोदय ।
ससीतालक्ष्मणारण्यं प्रयातोद्दिश्य तापस ॥ ९ ॥

अनुयात जनेनापि दूरं साकेतवासिना ।
पितृभ्यां तमसातीरं प्राप्त वञ्चिततज्जन ॥ १० ॥

शृङ्गिबेरपुरे लब्धनिषादक्षितिभृत्सख ।
तीर्णगङ्गासरित् भूयस्सन्निवर्तितसारथे ॥ ११ ॥

[भरद्वाजस्य] वचसा चित्रकूटमुपागत ।
सीतया प्राप्तविश्रुते रम्येष्वेतस्य सानुषु ॥ १२ ॥

पितुर्मरणतः पश्चान्मातुलस्य कुलात् पुरीम् ।
अयोध्यामागतेनात्मज[नकादर्शनो]द्भवात् १३ ॥

कोपात् सन्तप्तमनसा राज्यप्राप्तौ विरागिणा ।
वसिष्ठाद्यनुशिष्टेन निन्दितात्मपुरोधसा ॥ १४ ॥

भ्रात्रा शिष्येण दासेन भरतेन [मुहुर्मुहुः] ।
शिरसा याचितास्मै तु दत्तश्रीपादुकाद्वय ॥ १५ ॥

तस्मिन्निवृत्ते संत्यज्य चित्रकूटगिरिं गत ।
अत्र्याश्रमं तत्प्रिययानसूयाभिख्यया ततः ॥ १६ ॥

दिव्याम्बराङ्गरागादिवस्तुना जानकीगुणैः ।
प्रीतया मानितात्मीयदारानिन्दिततत्पद ॥ १७ ॥

॥ अरण्यकाण्डः ॥

प्रविष्टदण्डकारण्य तद्वासिमुनिसत्तमैः ।
आशासानै[दैत्यवधं] स्वरक्षार्थमुपस्थित ॥ १८ ॥

प्रतिश्रुतावनैतेषां भवद्विषयवासिनाम् ।
विराधमाथिन्नात्मीयपादचाराङ्कितात्रम ॥ १९ ॥

शरभङ्गादियमिनां वचसा[प्रीतमानस] ।
प्राप्तपञ्चवटीस्थान रम्ये गोदावरीतटे ॥ २० ॥

वृषस्यन्त्या शूर्पणख्या पतित्वेनार्थितार्तया ।
सौमित्रिणा छिन्ननासाकर्ण तस्याः स्वबाहुना ॥ २१ ॥

तत्क्षणेन तदार्त्युत्थखरादिरिपुभञ्जन ।
चतुर्दशसहस्रत्रियामाचरनिषूदन ॥ २२ ॥

तच्छ्रुत्वा सरुषा पङ्क्तिवदनेन तनूजतः (?) ।
सुन्दस्य स्वसहायेन मायामृगवपुर्भृता ॥ २३ ॥

विलोभितात्मदाराथ तया प्रेरित तद्गृहे ।
मारीचानुगतैतस्य प्राणहारिन्ननुद्रुत ॥ २४ ॥

जानकीवाक्यतप्तेन लक्ष्मणेन दशास्यतः ।
विजनादाश्रमपदात् गृहीतप्रिय चोरतः ॥ २५ ॥

मध्येमार्गं खगेन्द्रेण विरथेन कृताजिना ।
तत्प्राणहारिणाशोकवनिकास्थापितप्रिय ॥ २६ ॥

निवृत्तारण्यतस्सीताऽदर्शनात्तप्तमानस ।
अरण्येषु महीध्रेषु सरित्सु सरसीषु च ॥ २७ ॥

महिलाविचितोन्मत्तदशापन्न स्मरार्तिमन् ।
कृतसंस्कारगृध्रेश ब्रह्ममेधविधानतः ॥ २८ ॥

तन्मोक्षदायिन् सत्येन जितलोकप्रदानतः ।
शुश्रूषया च धनुषा जितदीनार्यशत्रुक ॥ २९ ॥

हृतयोजनबाह्वाख्योदरतूरकबन्धक (?) ।
[ततः प्रस्थाय] शबरीं प्राप्त सम्पूजितैतया ॥ ३० ॥

॥ किष्किन्धाकाण्डः ॥

पम्पातीरे हनुमता सङ्गताथाग्रजन्मना ।
बालिना सूनुना भानोर्निरस्तेन समन्त्रिणा ॥ ३१ ॥

ऋश्यमूकाद्रिशिखरे कृतसख्याग्निसाक्षिकम् ।
सालभञ्जनसञ्जातप्रत्ययेन तदुक्तितः ॥ ३२ ॥

हृतबालिन् पुनस्तस्मै दत्तवानरराजत ।
सहतारारुमं वर्षाकाले माल्यवदाह्वये ॥ ३३ ॥

गिरौ सीताविरहजं प्राप्त दुःखमगोचरम् ।
वाचां, कनीयसाश्वस्त कुपिते मत्तचेतसि ॥ ३४ ॥

ग्राम्यभोगरते भानुतनये स्वानुजे पुरीम् ।
किष्किन्धां याति तद्द्वारे विहितज्यारवे सति ॥ ३५ ॥

भीतेन हनुमद्वाक्यात् सुमित्रात्मजसान्त्वने ।
तारां प्रेषयता तेन कपीन् संगृह्यताखिलान् ॥ ३६ ॥

अरण्यपर्वतनदीवासानतिबलोत्कटान् ।
दिक्षु प्रेषयता सर्वास्वशेषान् वदतादभुतान् ॥ ३७ ॥

तेभ्यो देशान् समन्विष्टवैदेहतनयात्मजे ।
वायोरर्पितकार्यत्वादत्ताङ्गुलिविभूषण ॥ ३८ ॥

तारात्मदादियुक्तेन तत्र तत्र विचिन्वता ।
सीतां कालात्ययात्तीक्ष्णदण्डत्वाद्वानरप्रभोः ॥ ३९ ॥

भीतेनाश्वस्तमनसा सम्पातेर्वचसा पुनः ।
स्वभ्रातृवधदुःखस्य तस्मै दत्तजलाञ्जलेः ॥ ४० ॥

अशोकवनिकावाससीतादर्शितस्वचक्षुषः ।
रामसाह्याय्यकरणसमुत्थितगरुत्मतः ॥ ४१ ॥

॥ सुन्दरकाण्डः ॥

महेन्द्रशैलारूढेन तूर्णं तीर्णपयोधिना ।
अनाश्वस्तेन तन्मध्ये सिंहिकाद्यनिरोधिना ॥ ४२ ॥

प्रविष्टेन पुरीं लङ्कां रात्रौ तद्देवता जिता ।
शीधुपानमदाविष्टनिद्राणस्य वधूस्ततः ॥ ४३ ॥

दशास्यस्यालोकयता निराशेनापि दर्शने ।
वैदेह्याः शिंशपामूले वसन्त्यास्तत्तरोः पुनः ॥ ४४ ॥

दलावृतेन कथिताशेषराघववृत्ततः ।
प्रत्ययार्थं सशङ्कायः सीताया भूरुहात्ततः ॥ ४५ ॥

अवतीर्णेन दत्तस्वकरभूषेण सीतया ।
आलोकितेन शस्तेन कृतसंभाषणेन च ॥ ४६ ॥

उक्तकाकादिवृत्तेन दत्तचूडाविभूषतः ।
उक्तस्वदैन्यवाक्येन स्वमुद्दिश्य तु जीवनम् ॥ ४७ ॥

अनुज्ञातेन रचिताशोककाननभङ्गतः ।
प्रासादभेदिना रम्यतोरणं समुपेयुषा ॥ ४८ ॥

दासोऽहं कोसलेन्द्रस्येत्यादि श्रावयता वचः ।
किङ्करान् पञ्च सेनेशान् सप्त मन्त्रिसुतानपि ॥ ४९ ॥

जम्बुमालिनमक्षं च युद्धे हतवता बलात् ।
बलारिजिद्विसृष्टेन ब्राह्मेणास्त्रेण बन्धनात् ॥ ५० ॥

रज्ज्वन्तराणां संसर्गाद्विमुक्तेनाञ्जसा पुनः ।
तज्ज्ञात्वापि कृतां पीडां सहमानेन राक्षसैः ॥ ५१ ॥

प्रविष्टेन दशग्रीवसभां यातुभिरावृताम् ।
कथितस्वकपीशानसख्यमुख्यप्रवृत्तिना ॥ ५२ ॥

कुपितेनारिणा हिंसां कर्तुमुद्युञ्जता पुनः ।
विभीषणवचोभङ्गीविनिवर्तितचेतसा ॥ ५३ ॥

दहतास्य प्रियं वालमित्यादिष्टवता भटान् ।
दग्धवालेन वालाग्निदग्धारिपुरवेश्मना ॥ ५४ ॥

वैदेहीकरुणावाक्यशीतलाङ्गूलवह्निना ।
प्रस्थितेन पुनः शैलं त्रिकूटमधितिष्ठता ॥ ५५ ॥

तीर्णवारिधिना सर्वैर्नन्दितेनाङ्गदादिभिः ।
तेभ्यः प्रोक्तस्ववृत्तेन पानेऽनुमतिदायिना ॥ ५६ ॥

मधुनो वारितवता तद्वनावनवानरान् ।
दधिवक्त्रमुखानात्मसन्निधानमुपेयुषा ॥ ५७ ॥

विज्ञापितात्ममहिलादृष्टिवाक्य हनूमता ।
प्रशंसित परिष्वक्तमारुतात्मज ते नमः ॥ ५८ ॥

॥ युद्धकण्डः ॥

श्रुत्वा हनुमतो वाक्यं हरिवीरैर्वृताध्वनि ।
सुग्रीवप्रमुखैस्तीरं प्राप्त सिन्धुमहीपतेः ॥ ५९ ॥

तत्रागताय संत्यज्य पूर्वजं कालचोदितम् ।
[सत्य]वाक्यमशृण्वन्तं मैथिलीदानगोचरम् ॥ ६० ॥

स्वनिन्दनपरित्यक्तपुत्रदाराय धीमते ।
आत्मानं सर्वलोकानां शरण्यं भजते गतिम् ॥ ६१ ॥

सुग्रीवादीन् पुरस्कृत्य स्वाकिञ्चन्यपुरस्सरम् ।
विभीषणाय सर्वेभ्यो भूतेभ्योऽभयदायक ॥ ६२ ॥

इममाशङ्कमानानां सुग्रीवादिवनौकसाम् ।
परिहारकर स्वीयसामर्थ्यस्य प्रदर्शनात् ॥ ६३ ॥

भूयस्तदनुमत्या तमङ्गीकृत्याभिपेचनम् ।
कृतवांस्तस्य तद्वाक्यात् समुद्रं शरणागत ॥ ६४ ॥

दर्भानास्तीर्य तत्तीरे प्राङ्मुखाञ्जलिबन्धन ।
उपाधाय भुजं स्वीयं शयान प्रतिवारिधिम् ॥ ६५ ॥

तस्मिन्नदत्तवदने संत्यक्तक्षम कोपन ।
चापसंहितहैरण्यगर्भास्त्रास्मिन् समागते ॥ ६६ ॥

निष्कोपोत्तरपाथोधितीरस्थासुरमर्दन ।
तेन तद्वाक्यतो बद्धनलसेतो तदम्भसि ॥ ६७ ॥

तीर्णवारिनिधे शाखामृगसङ्घैः सहाचिरात् ।
तस्य दक्षिणतीरे तु प्राप्तलङ्कापुरान्तिक ॥ ३८ ॥

अध्वयानपरिश्रान्त त्रातवानरसैन्यक ।
सुवेलशैलशृङ्गस्थ सुग्रीवप्रमुखैः सह ॥ ६९ ॥

दृष्ट्वा त्रिकूटमूर्धस्थलङ्कापुर समन्ततः ।
तदीशमकुटीभङ्गकृता वानरभूभृता ॥ ७० ॥

पुनः सङ्गत तत्स्तोत्रपर तत्साहसाक्षम ।
निरुद्धलङ्कानगर काननालयपुङ्गवैः ॥ ७१ ॥

शक्रजित्प्रेरितैर्नागपाशैर्बद्धाङ्ग पक्षिणाम् ।
नाथेन मुक्तगात्रास्माद्बन्धनादपि कर्कशात् ॥ ७२ ॥

हतधूम्राक्ष पुत्रेण मरुतो वालिसूनुना ।
वज्रदंष्ट्रासुहननकर मारुतसूनुना ॥ ७३ ॥

हताकम्पन नीलेन हत(कपि)सेन महीभृता ।
हतरावणसैन्येशप्रहस्ताह्वयराक्षस ॥ ७४ ॥

प्रथमायोधने पङ्क्तिमुखप्रेरितशक्तितः ।
विद्धलक्ष्मण तेनानुद्धृतावरज शत्रुणा ॥ ७५ ॥

वायुसूनोस्तु सौहार्दाद्भक्त्या परमयापि च ।
उद्धृतौ ..... कनिष्ठाश्रितवत्सल (?) ॥ ७६ ॥

समितावधिरूढांससदागतिसुतोत्तम ।
पराजितस्वबाणार्तिमुक्तचापदशानन ॥ ७७ ॥

गत्वा विश्रम्यतां लङ्कामित्यनुज्ञाप्रदेशितुः ।
रक्षसां स्वाशुगस्मृत्या व्यथितारातिमानस ॥ ७८ ॥

तद्भयेनातिनिद्रस्योत्थापितस्यातियत्नतः ।
गिरिमात्रशरीरस्य कुम्भकर्णस्य युध्यतः ॥ ७९ ॥

कपिराजनखाक्रान्तकर्णनासस्य नर्दतः ।
वधकारिन् वालिसूनुहस्ताहतनरान्तक ॥ ८० ॥

हनुमत्संहृतस्वर्गनिलयान्तक तेन च ।
हतत्रिशीर्षातिकायप्राणासंहारिलक्ष्मण ॥ ८१ ॥

रावणीरितविध्यस्त्रविनताङ्गानुजादिभिः ।
सार्धं वायुसुतानीतदिव्यौषधविशेषतः ॥ ८२ ॥

विमुक्तपीड सुग्रीवहतकुम्भ हनूमता ।
निकुम्भप्राणहरण मकराक्षहर स्वयम् ॥ ८३ ॥

निकुम्भिलायां शक्रारिकृतहोमविघाततः ।
विभीषणवचोजातात् कुपितेनेन्द्रवैरिणा ॥ ८४ ॥

सार्धं कृताजिना नानादिव्यास्त्रज्ञेन धीमता ।
धर्मात्मेत्यादिपद्येन प्रतिज्ञां कुर्वता ततः ॥ ८५ ॥

सौमित्रिणा स्वानुजेन हतप्राणेन्द्रशात्रव ।
मिषत्सु वानरेन्द्रेषु नानामूर्तिधर स्वयम् ॥ ८६ ॥

हतमूलबलाढ्येन शौर्यवीर्यादिसम्पदा ।
नानास्त्रविदुषा देवसङ्घगर्वापकर्षिणा ॥ ८७ ॥

कृताजे पङ्क्तिवक्त्रेण स्यन्दनं जम्भभेदिनः ।
आरुह्य सूतेनानीतं दिव्यं मातलिनास्त्रतः ॥ ८८ ॥

अनेकधा विलूनारिदशशीर्ष स्वयंभुवः ।
अस्त्रेण संहृतारातेः पूर्वजस्योत्तरक्रियाम् ॥ ८९ ॥

कृतचित्तसमाधान न चिकीर्षोर्जुगुप्सया ।
विभीषणस्य तेनैव विहितारातिसंस्कृते ॥ ९० ॥

प्रलापवाक्यैस्तत्स्त्रीणां निजपारम्य[सूचकैः] ।
ज्ञापितोत्कर्ष सीतायां श्रुत्वा विजयमाहवे ॥ ९१ ॥

निजं हनूमद्वाक्येन सन्तुष्टौ राक्षसीगणम् ।
अपराधिनमप्यस्माद्रक्षन्त्यां दयया ततः ॥ ९२ ॥

विभूषितायां भूषाभिः स्नातायां निजमन्तिकम् ।
विभीषणेनानीतायामशोकगहनादरेः ॥ ९३ ॥

निजचारित्रसन्देहात् प्रविशन्त्यां हुताशनम् ।
समागतैर्ब्रह्ममुख्यैर्दैवतैर्विहितस्तुते ॥ ९४ ॥

तातं निजं पुरस्कृत्य दत्तसीत कृशानुना ।
शक्रादिवरलाभेन समुत्थापितवानर ॥ ९५ ॥

कृताभिषेक लङ्कायां रावणावरजस्य तु ।
यक्षनाथविमानेन पुष्पकेणाशुगामिना ॥ ९६ ॥

प्रतिप्रयात वैदेह्या प्रोक्तस्वचरिताध्वनि ।
सुग्रीवप्रमुखैःस्सार्धं सहृदारैः प्लवङ्गमैः ॥ ९७ ॥

श्रवणादस्य सन्तुष्टमानसाम्बुज····।
चरेभ्योऽप्यचरेभ्योऽपि दूर्वादिभ्यस्त्वहेतुकम् ॥ ११२ ॥

साकेतदेशवासिभ्यो दत्तमोक्ष दयानिधे ।
विजयीभव नित्यं त्वमयोध्याधिपनन्दन ॥ ११३ ॥

मङ्गलं राघवायास्तु मङ्गलं लक्ष्मणाय च ।
मङ्गलं भरतायास्तु शत्रुघ्नायापि मङ्गलम् ॥ ११४ ॥

सीतायै मङ्गलं भूयात्तनयाय सदागतेः ।
तत्सेवनपरायास्तु तद्भक्तिस्नेहराशये ॥ ११५ ॥

पुराय भूयात् साकेतनाम्ने दिव्यर्धिमीयुषे ।
अस्तूत्तराय देशाय कोसलायापि मङ्गलम् ॥ ११६ ॥

सम्बोधनमिदं स्तोत्रं सूनुना वादिभीकृतः ।
वेङ्कटेशेन रामस्य रचितं जयतात् सदा ॥ ११७ ॥

॥ इति श्रीरामसम्बोधनस्तोत्रं सम्पूर्णम् ॥

---

१३. ॥ अथ श्रीत्रैलोक्यमोहनवज्रपञ्जररामकवचम् ॥

अस्य श्रीत्रैलोक्यमोहनवज्रपञ्जरकवचस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीरामचन्द्रो देवता, रां बीजं, रीं शक्तिः, रूं कीलकम् । मम समस्तप्रारब्ध-परिहारद्वारा श्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः । रामित्यादि षडङ्गन्यासः । भूर्भुवस्सुवरोमिति दिग्बन्धः । ध्यानम् ।

नीलाम्भोधरकान्तिकान्तमनिशं वीरासनाध्यासितं
मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि ।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तं मकुटाङ्गदादिविलसद्रत्नोज्ज्वलाङ्गं भजे ॥ १ ॥

लमित्यादि पञ्चपूजा ।

ओं श्रीपार्वत्युवाच—

भगवन् सर्वदेश सर्वदेवनमस्कृत ।
सर्वं मे कथितं देव राममन्त्रं विशेषतः ॥ २ ॥

त्रैलोक्यमोहनं नाम कवचं पूर्वसूचितम् ।
कथयस्व महाभाग यद्यहं तव वल्लभा ॥ ३ ॥

श्री ईश्वर उवाच—

शृणु वक्ष्यामि देवेशि कवचं परमाद्भुतम् ।
अत्यन्तगोपितं गुह्यं ब्रह्ममन्त्रौघविग्रहम् ॥ ४ ॥

कवचस्य ऋषिर्ब्रह्मा गायत्री छन्द ईरितम् ।
देवता रामचन्द्रोऽस्य विनियोगोऽष्टसिद्धिषु ॥ ५ ॥

ओम् । प्रणवो मे शिरः पातु तारकब्रह्मरूपधृत् ।
अनन्तोऽग्निसहस्रेन्दुः नासां पातु रघोः पतिः ॥ ६ ॥

रां रामाय नमस्तुभ्यं षड्वर्णो भुक्तिमुक्तिदः ।
फालं पायान्नेत्रयुग्मं रामो द्व्यक्षरसंज्ञकः ॥ ७ ॥

रां रामचन्द्राय नमो भ्रूद्वयं पातु मेऽन्वहम् ।
रां रामभद्राय नमश्चुबुकं पातु मे सदा ॥ ८ ॥

क्ष्रीं मे पायाच्छ्रोत्रयुग्मं कर्णौ मे विश्वमोहनः ।
क्ष्रीं रामाय नमश्चेति मुखं मे परिरक्षतु ॥ ९ ॥

तारं रामचतुर्थं तु क्रोधास्त्रवह्निकल्पितम् (?) ।
अष्टर्णोऽयं परो मन्त्रो जिह्वां मे पातु सर्वदा ॥ १० ॥

गुणं बीजं तथा मायां हृद्रामाय ततश्चर ।
शिरो मां राममन्त्रोऽयं गण्डयुग्मं सदावतु ॥ ११ ॥

ओं हृद्भगवते रामचन्द्रभद्रौ च ङेयता ।
अर्कानुद्विविधौ मन्त्रौ रक्षतां मम कन्धरम् ॥ १२ ॥

रां रामचन्द्राय स्वाहा षड्वर्णोऽव्याद्भुजद्वयम् ।
श्रीरामाय नमश्चासौ कक्षौ पातु खरान्तकः ॥ १३ ॥

... ...नृसिंहो लक्ष्मीपाशाङ्कुशस्ततः ।
वर्मास्त्राणि वधू युक्तो रव्यर्णोऽव्यादुरःस्थलम् ॥ १४ ॥

श्रीरामचन्द्राय ततो रक्षोघ्नाय नमस्त्वयम् ।
हृदयं मे सदा पातु रघुवंशसमुद्भवः ॥ १५ ॥

रामाङ्गेतु वराहास्त्रं वह्निजायायुतं मनुः ।
वीरस्वरूपरामाभ्यां सप्तार्णो पातु पार्श्वकौ (?) ॥ १६ ॥

ओं श्रीं ह्रीं क्लीं ततो रामं च रामाय नमस्त्वयम् ।
दशाक्षराङ्गो मन्त्रो मे पुरतः पृष्ठतोऽवतु ॥ १७ ॥

श्रीपूर्वं जय मध्यस्थं तद्विधा राम राम च ।
नमः पञ्चदशर्णोऽयं सदा पातु ममोदरम् ॥ १८ ॥

हुं जानकीवल्लभाय स्वहाद्यावतु मध्यमम् ।
श्रीरामचन्द्राय स्वाहा नाभिमष्टाक्षरोऽवतु ॥ १९ ॥

ह्रीं रामचन्द्राय ततः सीतायाः पतये नमः ।
मन्वस्यः सक्थिनी पातु राक्षसेन्द्रविमर्दनः ॥ २० ॥

ओं रामभद्राय नमो गुह्यं मे पातु राघवः ।
श्रीरामभद्राय नमो मम पातूरुयुग्मकम् ॥ २१ ॥

प्रणवो रामचन्द्राय स्वापात्यष्टाक्षरोऽवतु ।
पादयुग्मं सदा पातु वानरेन्द्राश्रयः प्रभुः ॥ २२ ॥

रामभद्र महेष्वास रघुवीर नृपोत्तम ।
दशास्यान्तक मां रक्ष देहि नः परमे[मां]श्रियम् ॥ २३ ॥

द्वात्रिंशदक्षरो य[:]स्यात् सर्वाङ्गं पातु मे सदा ।
श्रीं सीतापतये नमः प्राच्यां मां सर्वदावतु ॥ २४ ॥

हुं जानकीवल्लभाय स्वाहा याम्यां च सर्वदा ।
ह्रीं जानकीवल्लभाय प्रतीच्यां सर्वदावतु ॥ २५ ॥

श्रीरघुनन्दनाय नमः कौबेर्यां दिशि रक्षतु ।
श्रीं सीतायै ततः स्वाहा रां रामाय नमस्त्वयम् ॥ २६ ॥

सीतारामाख्यमन्त्रे[न्त्रोऽयं]विदिक्षूर्ध्वमधश्च माम् ।
नमो भगवते ब्रूयाच्चतुर्थ्यां रघुनन्दनः ॥ २७ ॥

रक्षो घोरदि... ...मधुरादि समीरयेत् ।
प्रसन्नवदनायेति पश्चादमितितेजसे ॥ २८ ॥

बलाय पश्चाद्रामाय विष्णवे तदनन्तरम् ।
प्रणवादिनमोऽन्तोऽयं मालामन्त्र उदीरितः ॥ २९ ॥

सर्वस्थानेषु कालेषु पातु मां रघुनन्दनः ।
वदेद्दाशरथायेति विद्महेति पदं ततः ॥ ३० ॥

सीतापदं समुद्धृत्या[समुद्धार्य]वल्लभायपदं ततः ।
धीमहीत्यथ तं नोऽथ रामश्चापि प्रचोदयात् ॥ ३१ ॥

एषा स्याद्रामगायत्री सर्वावस्थासु पातु माम् ।
इति ते कथितं देवि सर्वमन्त्रौघविग्रहम् ॥ ३२ ॥

त्रैलोक्यमोहनं नाम कवचं ब्रह्मरूपकम् ।
प्रातः काले पठेद्यस्तु कवचं मुक्तिसाधकम् ॥ ३३ ॥

कीर्तिश्रीकान्तिमेधायुर्भूतिश्च भवति ध्रुवम् ।
राममन्त्रमथ ब्रह्मकवचं मनुचोदितम् ॥ ३४ ॥

गुह्यमभ्यर्च्य विधिवत् पुनश्चर्यां समाचरेत् ।
अष्टोत्तरशतं जप्त्वा दशांशं हवनादिकम् ॥ ३५ ॥

ततः सुसिद्धं कवचं सर्वकार्याणि साधयेत् ।
मन्त्रसिद्धिर्भवेत्तस्य पुरश्चर्यां विना ततः ॥ ३६ ॥

लाज आज्यं च ।

गद्यपद्यमयी वाणी तस्य वक्त्रात्प्रवर्तते ।
वक्त्रे तस्य वसेद्वाणी कलाश्च निश्चला गृहे ॥ ३७ ॥

पुष्पाञ्जल्यष्टकं दत्त्वा मलेनैव परे सकृत् ।
अपि वर्षसहस्राणि पूजायाः फलमाप्नुयात् ॥ ३८ ॥

विलिख्य भूर्जपत्रे तु स्वर्णस्थं धारयेद्यदि ।
कर्णे च दक्षिणे बाहौ स कुर्या वतं[दवितं]जगत् ॥ ३९ ॥
त्रैलोक्यं क्षोभयत्येव त्रैलोक्यविजयी भवेत् ।
तद्वात्रं प्राप्य शास्त्राणि ब्रह्मास्त्रादीनि यानि च ॥ ४० ॥

माल्यानि कुसुमानीव सुखदानि भवन्ति हि ।
सार्धमु.....हवने लक्ष्मीवाणीमुखे वसेत् ॥ ४१ ॥

य इदं कवचं ज्ञात्वा यो जपेद्राममन्त्रकम् ।
शतलक्षमवाप्नोति सोऽचिरान्मृत्यु [न्मुक्ति] माप्नुयात् ॥ ४२ ॥
त्रैलोक्यमोहनं जप्त्वा न मन्त्रासिद्धिसाधकः ।
स शस्त्रघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात् ।
तस्मात् सर्वप्रयत्नेन कवचं धारयेद्बुधः ॥ ४३ ॥

॥ इति ब्रह्माण्डपुराणे पार्वतीश्वरसंवादे त्रैलोक्यमोहनवज्रपञ्जररामकवचं नाम दिव्यमन्त्रकवचं सम्पूर्णम् ॥

१४. ॥ अथ श्रीरामशतकम् ॥

आपादकेशमतिसुन्दरदिव्यगात्रं
श्रीपादरेणुहृतगौतमदारशापम् ।
कोपातिरक्तनयनक्षुभिताम्बुराशिं
भूपालसूनुमवलोकय रामचन्द्रम् ॥ १ ॥

कोदण्डकोटिविनिवेशितबाहुदण्ड-
माखण्डलाद्यमरपातितपुष्पवर्षम् ।
अयोधनक्षितिरजःपरिधूसराङ्ग-
मव्याद्विरं रघुपतेरवसन्नशत्रोः ॥ २ ॥

चन्द्रोपमं मलयचन्दनरूषिताङ्गं
मन्दारप्पपरिपूजितपादपद्मम् ।
ब्रह्मेन्द्रदेवमुनियोगिगणावृतं तं
वन्देऽरविन्दनयनं रघुरामचन्द्रम् ॥ ३ ॥

सम्पूर्णचन्द्रवदनं सरसीरुहाक्षं
माणिक्यकुण्डलधरं मकुटाभिरामम् ।
चाम्पेयगौरवसनं शरचापहस्तं
श्रीरामचन्द्रमनिशं कलयामि चित्ते ॥ ४ ॥

सीतापतिं कमलपत्रविशालनेत्रं
रामं कृपाकरमनन्तगुणानुरक्तम् ।
इन्द्रादिसर्वसुरसिद्धसुपूजिताङ्घ्रिं
नित्यं भजेऽहमसुनायकमप्रमेयम् ॥ ५ ॥

एकेन बाणमितरेण करेण चापं
हारं वहन्तमुरसा शिरसा जटाश्च ।
सीतासहायमनुजेन वने चरन्तं
श्रीरामचन्द्रमनिशं कलयामि चित्ते ॥ ६ ॥

संसारसागरसमुद्धरणैकमन्त्रं
ब्रह्मादिदेवमुनिसेवितसिद्धमन्त्रम् ।
दारिद्र्यदुःखभवरोगविनाशमन्त्रं
सेवे सदा गुणनिधिं रघुरामचन्द्रम् ॥ ७ ॥

सीतासमेतमजिनाम्बरमप्रमेयं
सौमित्रिणा नियतसेवितपादयुग्मम् ।
नीलोत्पलद्युतिमनन्तगुणं प्रशान्तं
श्रीरामचन्द्रमनिशं कलयामि चित्ते ॥ ८ ॥

श्रीराघवं दशरथामजमप्रमेयं
सीतापतिं रघुकुलान्वयरत्नदीपम् ।
आजानुबाहुमरविन्ददलायताक्षं
रामं निशाचरविनाशकरं नमामि ॥ ९ ॥

श्रीराघवं दशमुखान्तकमम्बुजाक्षं
सीतामनोरमणमम्बुदनीलदेहम् ।
काकुत्स्थवंशपयसांनिधिपूर्णचन्द्रं
श्रीरामचन्द्रमनिशं शिरसा नमामि ॥ १० ॥

राकाशशाङ्कवदनं रघुवंशदीपं
राजाधिराजतनयं रमणीयमूर्तिम् ।
रात्रिञ्चरान्तकमनन्तगुणं मनोज्ञं
श्रीरामचन्द्रमनिशं शरणं भजेऽहम् ॥ ११ ॥

कन्दर्पकोटिसदृशं करुणाम्बुराशिं
काकुत्स्थवंशकनकाचलरत्नदीपम् ।
कञ्जातपत्रनयनं करचापबाणं
कल्याणराममनिशं शरणं भजेऽहम् ॥ १२ ॥

विश्वाधिपं विबुधपूजितपादपद्मं
विप्रप्रियं विमलपङ्कजपत्रनेत्रम् ।
विद्यात्मकं विजितराक्षसवीरकोटिं
श्रीवीरराममनिशं शरणं भजेऽहम् ॥ १३ ॥

पद्मासनादिपुरुहूतसुरार्चितं तं
पापान्धकारतरणिं पवनात्मजेशम् ।
पङ्केरुहाक्षमखिलश्रुतिमौलिसारं
पट्टाभिराममनिशं शरणं भजेऽहम् ॥ १४ ॥

श्रीवत्सहारमकुटाङ्गदभूषिताङ्गं
श्रीभारतीविधृतचामरवीज्यमानम् ।
श्रीनायकं शिवविरिञ्चिनुताङ्घ्रिपीठं
श्रीरामचन्द्रमनिशं शरणं भजेऽहम् ॥ १५ ॥

यत्पादपङ्कजरजः श्रुतिभिर्विमृग्यं[ग्यं]
यन्नाभिपङ्कजभवः कमलासनश्च ।
यन्नामसाररसिको भगवान् पुरारिः
श्रीरामचन्द्रमनिशं कलयामि चित्ते ॥ १६ ॥

हा राम हा रमण हा जगदेकवीर
हा नाथ हा रघुपते करुणालवाल ।
हा जानकीरमण हा जगदेकबन्धो
हा रामभद्र जनपालक पाहि नित्यम् ॥ १७ ॥

हा वीर हा दशरथात्मज मैथिलीश
हा देव हा पवनजप्रिय दीनबन्धो ।
हा धीर हा दशमुखान्तक लोकनाथ
हा भूप हा भरतपूर्वज पाहि नित्यम् ॥ १८ ॥

जानाति राम तव नामरुचिं महेशो
जानाति गौतमसती चरणप्रभावम् ।
जानाति दोर्बलपराक्रममीशचापो
जानात्यमोघपटुबाणगतिं पयोधिः ॥ १९ ॥

जानाति राम तव चित्तगतिं हनूमान्
जानाति राम तव सख्यरुचिं कपीन्द्रः ।
जानाति राम तव युद्धगतिं दशास्यो
जानाति राम [1]विमतानुज एव सत्यम् ॥ २० ॥

श्रीराम राम रघुनन्दन राम राम-
श्रीराम राम भरताग्रज राम राम ।
श्रीराम राम हनुमत्प्रिय राम राम
श्रीराम राम शरणं भव राम राम ॥ २१ ॥

श्रीरामचन्द्र करुणाकर रामचन्द्र
राजेन्द्रचन्द्र रघुवंशसमुद्रचन्द्र ।
सुग्रीवनेत्रयुगलोत्पलपूर्णचन्द्र
सीतामनःकुमुदचन्द्र नमो नमस्ते ॥ २२ ॥

वन्देन्दु[ऽब्ज]मौलिमणिशोभिपदारविन्दं
वन्दे सुचापशरशोभिकरारविन्दम् ।

---

1. विमतस्य शत्रो रावणस्य अनुजः विभीषणः ।

वन्दे सदा स्मितलसद्वदनारविन्दं
वन्दे कटाक्षविलसन्नयनारविन्दम् ॥ २३ ॥

वन्दे रघूत्तमकुलार्णवपूर्णचन्द्रं
वन्दे दशाननभुजङ्गविहङ्गमेन्द्रम् ।
वन्दे समर्चितकवीन्द्रसुरामरेन्द्रं
वन्दे कृपाजलनिधिं रघुरामचन्द्रम् ॥ २४ ॥

भवतिमिरपतङ्गं पापतूलस्फुलिङ्गं
प्रणवतरुविहङ्गं भक्तचित्ताब्जभृङ्गम् ।
निगमवनकुरङ्गं नीरदश्यामलाङ्गं
रघुकुलगिरिशृङ्गं नौमि सीतान्तरङ्गम् ॥ २५ ॥

सरसिजदलनेत्रं सर्वलोकैकमित्रं
दशरथवरपुत्रं नीलजीमूतगात्रम् ।
सकलजनपवित्रं सर्वदा सच्चरित्रं
विधृतकनकवस्त्रं[नेत्रं] नौमि सीताकलत्रम् ॥ २६ ॥

वदनजितनिशेशं कोटिसूर्यप्रकाशं
सकलजगदधीशं माल्यसंशोभिकेशम् ।
निखिलसुरमुनीशं दूतशाखामृगेशं
विजितनिशिचरेशं नौम्यहं जानकीशम् ॥ २७ ॥

सकलभुवनराजं सर्वशास्त्रार्थबीजं
नयनजितसरोजं सर्वदा सत्समाजम् ।
अघकरिमृगराजं सेवकामर्त्यराजं
दशरथसुतनूजं नौम्यहं राजराजम् ॥ २८ ॥

निगमविपिनकीरं वेदवेदान्तसारं
भवजलनिधिपारं कण्ठसंशोभिहारम् ।
तुहिनशिखरधीरं जानकीप्रेमदारं
रुचिरतरशरीरं नौम्यहं रामवीरम् ॥ २९ ॥

दशरथनृपबालं वेदकल्पद्रुमूलं
नतजनपरिपालं सर्वदा लोकपालम् ।
विधृतकनकचेलं वानरेन्द्रादिजालं[1]
मरतकमणिनीलं नौमि सीतानुकूलम् ॥ ३० ॥

---

1. जालम् = गर्वः

नतसुरनिकुरुम्बं वक्त्रशीतांशुबिम्बं
कलभगतिविडम्बं दीनचित्तावलम्बम् ।
सहचरविधिसाम्बं सर्वदा सत्कदम्बं
करविधृतकलम्बं नौमि सीताकुटुम्बम् ॥ ३१ ॥

रघुकुलमणिदीपं सर्वलोकैकभूपं
हृतजनपरितापं दत्तदीनादिगोपम् ।
धृतमकुटकलापं हस्तविन्यस्तचापं
कृतजलनिधिकोपं नौमि कल्याणरूपम् ॥ ३२ ॥

पवनतनयदूतं सर्वदा मन्त्रगीतं
कुशलवबरतातं रावणादिप्रघातम् ।
धृतलसदुपवीतं चन्दनात्यन्तशीतं
त्रिभुवनजनपूतं नौमि सीतासमेतम् ॥ ३३ ॥

विकचकमलतुण्डं चापविद्यातिशौण्डं
करिकरभुजदण्डं कुण्डलाशोभिगण्डम् ।
नखजितशशिखण्डं हस्तसंशोभिकाण्डं
विधृतमणिशिखण्डं नौमि रामं प्रचण्डम् ॥ ३४ ॥

निगमशिरसि रत्नं सर्वलोकैकरत्नं
दशरथसुतरत्नं सीतया सेव्यरत्नम् ।
भुवनवलयरत्नं भू भुजामेकरत्नं
रघुकुलघनरत्नं पातु मां रामरत्नम् ॥ ३५ ॥

जगति विबुधमन्त्रं जानकीप्राणमन्त्रं
विबुधविनुतमन्त्रं विश्वविख्यातमन्त्रम् ।
दशरथसुतमन्त्रं दैत्यसंहारमन्त्रं
रघुपतिनिजमन्त्रं राम रामेति मन्त्रम् ॥ ३६ ॥

सजलजलदनीलं सन्मुनिस्तुत्यलीलं
निखिलनिगममूलं यातुधानान्तकालम् ।
तिलकलसितफालं सर्वदा लोकपालं
विधृतकनकचेलं नौमि सीतानुकूलम् ॥ ३७ ॥

विमलकमलनेत्रं विस्फुरन्नीलगात्रं
तपनकुलपवित्रं दानवध्वान्तमित्रम् ।
भुवनहितचरित्रं भूमिपुत्रीकलत्रं
रघुपतिवरपुत्रं नौम्यहं चन्द्रवक्त्रम् ॥ ३८ ॥

मरतकमणिनीलो मत्तमातङ्गलीलो
मधुरवचनशीलो मारुतिप्रेममूलः ।
मणिसुकुरकपोलो मैथिलीकेलिलोलो
मम हृदि रघुपालो पातु मारीचकालः ॥ ३९ ॥

त्रिदशकुमुदचन्द्रो दानवाम्भोजचन्द्रो
मरुत[दितिज]तिमिरचन्द्रो योगिनां ज्ञानचन्द्रः ।
प्रणतनयनचन्द्रो भक्तिचित्तास्मिचन्द्रो
वदनविजितचन्द्रः पातु मां रामचन्द्रः ॥ ४० ॥

निखिलभुवननेता नित्यकल्याणदाता
त्वमिति न हि विवादस्तत्र घण्टानिनादः ।
जनयति मम हासं जातु चेतोनिवासं
मम कुरु गुणसिन्धो मैथिलीप्रणाबन्धो ॥ ४१ ॥

पटुजलधरधीराध्वानमाकृष्य चापं
पवनजवनमेकं बाणमादाय तूणात् ।
अभयवचनदायी सानुजः सर्वतो मे
रणहतदनुजेन्द्रो रामचन्द्रः सहायः ॥ ४२ ॥

कुवलयदलनीलः पीतवासा दयालु-
र्विविधरुचिरभूषाभूषितो दिव्यमूर्तिः ।
दशरथकुलनाथो मैथिलीप्राणनाथो
निवसतु मम चित्ते सर्वदा रामचन्द्रः ॥ ४३ ॥

मरतककनकाभौ मण्डलीभूतचापौ
भुवनभरणदक्षौ पुण्डरीकायताक्षौ ।
मकुटकनकभूषौ वीरलक्ष्मीसमेतौ
परिचरति मनो मे जानकीरामचन्द्रौ ॥ ४४ ॥

जयतु जयतु रामो जानकीमोदकारी
दशवदनकुलारी रम्यकोदण्डधारी ।
विविधविपिनचारी विष्णुपूर्णावतारी
सकलदनुजहारी सर्वलोकाधिकारी ॥ ४५ ॥

कनकनिकषभासा सीतयालिङ्गिताङ्गो
नवकुवलयदामश्यामवर्णाभिरामः ।
अभिनव इव विद्युन्मण्डितो मेघराशिः
शमयतु परितापं सर्वदा रामभद्रः ॥ ४६ ॥

श्रीरामचन्द्रः श्रितपारिजात-
समस्तकल्याणगुणाभिरामः ।
सीतामुखाम्भोरुहचञ्चरीको
निरन्तरं मङ्गलमातनोतु ॥ ४७ ॥

दयानिधे राघव रामचन्द्र
निरस्य पापानि ममाखिलानि ।
त्वय्येव भक्तिं सुदृढां प्रयच्छ
सैव प्रसूते सकलान् पुमर्थान् ॥ ४८ ॥

रामेति वर्णद्वयमादरेण
सदा जपन् मुक्तिमुपैति जन्तुः ।
कलौ युगे कल्मषमानसाना-
मन्यत्र धर्मे खलु नाधिकारः ॥ ४९ ॥

रामेति सीतारमणेति मेघ-
श्यामेति काकासुररक्षकेति ।
पीताम्बरेति प्रियलक्ष्मणेति
श्रीरामचन्द्रेति वदाशु जिह्वे ॥ ५० ॥

श्रीरामचन्द्रेति सलक्ष्मणेति
नीलोत्पलश्यामल कोमलेति ।
आक्रोश रामेत्यघुनैव जिह्वे
सीतापते राघव राघवेति ॥ ५१ ॥

इन्दीवरश्यामलमायताक्षं
धनुर्धरं नीलजटावचूडम् ।
पार्श्वद्वये लक्ष्मणमैथिलीभ्यां
निषेव्यमाणं प्रणतोऽस्मि रामम् ॥ ५२ ॥

आकर्णमाकृष्य धनुर्गुणोद्य-
दूब्रह्मास्त्रलक्षीकृतराक्षसेन्द्रम् ।
रथाधिरूढं रणरङ्गधीरं
रामं भजे रक्तसरोरुहाक्षम् ॥ ५३ ॥

अकार्मुकालङ्कृतबाहुदण्डै-
रराक्षसाधीश्वरभङ्गदक्षैः ।
अजानकीन्द्रैरपयोदनीलै-
ररामचन्द्रैरलमन्यदैवैः ॥ ५४ ॥

अलं विवादेन न मानुषोऽयं
रामात्मना राक्षसमर्दनाय ।
भुजङ्गशय्यां परिमुच्य साक्षा-
न्नारायणो भूमितलं जगाम ॥ ५५ ॥

कल्याणदं कौशिकयज्ञपालं
कलानिधिं काञ्चनशैलधैर्यम् ।
कञ्जातनेत्रं करुणासमुद्रं
काकुत्स्थरामं कलयामि चित्ते ॥ ५६ ॥

मर्त्यावतारे मनुजाकृतिं हरिं
रामाभिदेहं[भिधेयं] रमणीयदेहम् ।
धनुर्धरं पद्मपलाशनेत्रं
नमामि नित्यं रघुनाथमूर्तिम् ॥ ५७ ॥

विशालनेत्रं परिपूर्णगात्रं
सीताकलत्रं शुभसच्चरित्रम् ।
सुग्रीवमित्रं जगतः पवित्रं
वन्दे सुवक्त्रं वरभूपपुत्रम् ॥ ५८ ॥

कारीरभासा कलयन् विनोदं
शारीरभासा जितशाम्बरारिः ।
वारीशगेहे कृतसेतुरीशो
मारीचवैरी मम सन्निधत्ताम् ॥ ५९ ॥

वदन्तु केचिच्चतुरोऽपि वेदान्
पठन्तु शास्त्राण्यपरेऽखिलानि ।
अटन्तु तीर्थान्यपरे पृथिव्यां
वयं तु रामं मनसा स्मरामः ॥ ६० ॥

नमामि रामं नतपारिजातं
करोमि रामाङ्घ्रिसरोजपूजाम् ।
वदामि रामस्य सुदिव्यनाम
स्मरामि रामं न तु विस्मरामि ॥ ६१ ॥

अन्नं नराणाममृतं सुराणां
भृङ्गावलीनां मकरन्द एव ।
श्रीरामपादाम्बुजसेवकानां
महात्मनां रामकथैवमुक्ता ॥ ६२ ॥

श्रीशब्दपूर्वं जयशब्दमत्यं[मध्यं]
जयद्वायावुत्तरत[द्वयं चोत्तरत]स्तथैव ।
त्रिस्सप्तकृत्वो भुवि रामनाम-
जपं तु हन्याद्द्विजकोटिहत्याम् ॥ ६३ ॥

यो दण्डकारण्यनिशाचरेन्द्रान्
कोदण्डलीलाविषयीचकार ।
वेतण्डशुण्डायितबाहुदण्डो
कोदण्डपाणी[णिः]कुलदैवतं नः ॥ ६४ ॥

कोदण्डदीक्षागुरुमप्रमेयं
सलक्ष्मणं दाशरथिं दयालुम् ।
महानुभावं जगदेकवीर-
मनाथनाथं रघुनाथमीडे ॥ ६५ ॥

रामः पिता राघव एव माता
रामः सुबन्धुश्च सुहृत् स एव ।
रामो गुरुर्मे परमं च दैवं
रामं विना नान्यमहं स्मरामि ॥ ६६ ॥

माता रामो मत्पिता रामभद्रो
भ्राता रामो मत्सखो राघवेशः ।
भर्ता त्राता रामचन्द्रो दयालु-
र्नान्यं जाने नैव जाने न जाने ॥ ६७ ॥

रघुनन्दन एव दैवतं नो
रघुवंशोद्भव एव दैवतं नः ।
भरताग्रज एव दैवतं नो
भगवान् राघव एव दैवतं नः ॥ ६८ ॥

दीनवत्सलमनाथरक्षकं
दीर्घबाहुमरविन्दलोचनम् ।
दीक्षितं सकललोकरक्षणं
दैवतं दशरथात्मजं भजे ॥ ६९ ॥

इन्द्रनीलमणिसन्निभदेहं
वन्द्यमानचरणं मुनिवृन्दैः ।
लम्बमानतुलसीवनमालं
चिन्तयामि सततं रघुवीरम् ॥ ७० ॥

चापं दधानः स्तनयित्नुघोषं
कर्षन्निषङ्गादिषुमप्यरिघ्नम् ।
आपत्सु भूयादभयप्रदो मे
साकं सुमित्रातनयेन रामः ॥ ७१ ॥

[1]यः पूतनामारणलब्धवर्णः
काकोदरो येन विनीतदर्पः ।
यशोदयालंकृतमूर्तिरन्या-
न्नाथो यदूनामथ वा रघूणाम् ॥ ७२ ॥

जातो वंशे रघूणां मुनिवरवचनात्तटकां ताडयित्वा
कृत्वा पुण्यामहल्यां त्रुटितभवधनुर्मैथिलीवल्लभोऽभूत् ।
प्राप्यायोध्यां निदेशात् पितुरटविमगाद्गीतसीतोऽस्तवाली
बद्धाब्धिर्ध्वस्तलङ्को दलितदशमुखः सीतया राज्यमाप ॥ ७३ ॥

रामं श्यामाभिरामं रविशशिनयनं कोटिसूर्यप्रकाशं
दिव्यं दिव्यास्त्रपाणिं शरमुखशरधिं चारुकोदण्डहस्तम् ।
कालं कालाग्निरुद्रं रिपुकुलदहनं विघ्नविच्छेददक्षं
भीमं भीमाट्टहासं सकलभयहरं रामचन्द्रं भजेऽहम् ॥ ७४ ॥

रामं वीरासनस्थं हृदयगतकरव्यञ्जितज्ञानमुद्रं
जानौ विन्यस्तहस्तं जनकतनयया भूषितं वामभागे ।
षट्छास्त्रं व्याहरन्तं पवनसुतनयं चाग्रतो मानयन्तं
संसेवे सेव्यमानं करधृतधनुषा दक्षिणे लक्ष्मणेन ॥ ७५ ॥

वामे कोदण्डदण्डं निजकरकमले दक्षिणे बाणमेकं
पश्चाद्भागे च नित्यं विदधदभिमतं सासितूणीरभारम् ।
वामे भागे लसद्भ्यां सहमिलिततनुं जानकीलक्ष्मणाभ्यां
रामं श्यामं भजेऽहं प्रणतजनमनःखेदविच्छेददक्षम् ॥ ७६ ॥

शुद्धान्ते मातृमध्ये दशरथपुरतः सञ्चरन्तं मनोज्ञं
काञ्चीदामानुविद्धप्रतिमणिविलसत्किङ्किणीनिकणाङ्कम् ।
फाले मुक्ताललामं मृदुतरनिनदं नूपुरं चारुहारं
बालं रामं भजेऽहं मृदुमधुररिरं कुण्डलश्रीकपोलम् ॥ ७७ ॥

---

1. रामपक्षेः—पूतनामा रणलब्धवर्णः इति पदच्छेदः । काकोदरः काकासुरः । यशः दया द्वाभ्यां अलंकृतमूर्तिः । कृष्णपक्षेः—पूतना राक्षसी । काकोदरः सर्पः कालियः । यशोदा नन्दस्य पत्नी ।

लोकत्राणानुकारी दशवदनशिरःपङ्क्तिविच्छेदकारी
सीतासीमन्तकारी मणिमयमकुटोद्दण्डकोदण्डधारी ।
लङ्कालङ्कारहारी भृगुतनयमनःसर्वगर्वापहारी
[वालिप्राणापहारी] शमयतु दुरितं भूमिभारापहारी ॥ ७८ ॥

जातः श्रीरघुनायको दशरथान्मुन्याज्ञया ताटकां
हत्वा रक्षितकौशिकक्रतुवरः कृत्वाप्यहल्यां शुभाम् ।
भङ्क्त्वा भार्गशरासनं जनकजामुद्वाह्य रामस्थितो [रामः स्थितं]
जित्वा चाध्वनि भार्गवं पुनरगात् सीतासमेतं भजे ॥ ७९ ॥

स श्रेयांसि बलीनि संदिशतु ते वीरः कृपात्मा शुचिः
यन्नेत्राञ्चलरक्तिमा समतनोदब्धीश्वराग्रस्थितिम् ।
यद्वक्षो विमतानुजाय सदयं लङ्काधिपत्यं ददौ
यत्पादाब्जपरागपालिरकरोत् पाषाणमेणीदृशम् ॥ ८० ॥

गीतार्थामृतवारिधिं रघुपतिं शीतांशुविम्बाननं
सूताङ्गीरसनारदैरभिनुतं वातात्मजाभीष्टदम् ।
आताम्राधरशोभितं सुरनुतं पीताम्बरालङ्कृतं
सीताराममहं भजामि शरणं कारुण्यदुग्धार्णवम् ॥ ८१ ॥

श्रीरामोऽजनि राघवो मुनिमखं पाति स्म सीतापतिः
कान्तारणि निनाय वीतभयतां रामेण वाली हतः ।
आनन्दं हनुमत्... ...रघुपतिर्निन्ये जजृम्भे बले ?
लङ्केशःस्वपदात् स्वयं विजघटे रामः स्त्रियागात्पुरीम् ॥ ८२ ॥

श्रीरामं जगदेकवीरममलं सीतामनोहारिणं
कौसल्यावरनन्दनं सुरनुतं काकुत्स्थवंशोद्भवम् ।
लोकानामभिवाञ्छितार्थफलदं कारुण्यकल्पद्रुमं
वन्देऽहं जनघोरपापनिकरध्वंसव्रतं राघवम् ॥ ८३ ॥

रामं लक्ष्मणपूर्वजं रघुपतिं सीतापतिं सुन्दरं
काकुत्स्थं करुणाकरं गुणनिधिं विप्रप्रियं धार्मिकम् ।
[1]राजेन्द्रं सत्यसन्धं दशरथतनयं श्यामलं शान्तमूर्तिं
वन्दे लोकाभिरामं रघुकुलतिलकं राघवं रावणारिम् ॥ ८४ ॥

रामं चन्दनशीतलं मणिलसद्वक्षमाम्बरालङ्कृतं
कौसल्यातनयं विशालनयनं सम्पूर्णचन्द्राननम् ।

---

1. भिन्नवृत्तः श्लोकार्धः

राजानं करुणासमेतमनघं सीतामनोहारिणं
सीतादर्शनलालसं गुणनिधिं वन्दे सदा राघवम् ॥ ८५ ॥

रामं रत्नकिरीटकुण्डलधरं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं वीरासने सुस्थितम् ।
सुग्रीवादिसमस्तवानरगणैः संसेव्यमानं सदा
विश्वामित्रपराशरादिमुनिभिः संस्तूयमानं भजे ॥ ८६ ॥

रामं राजशिरोमणिं रघुवरं देवारिदर्पापहं
लोकानां हितकारिणं गुणनिधिं कारुण्यपूर्णोदयम् ।
मुक्ताकाञ्चनभूषणान्विततनुं चापेषुहस्ताम्बुजं
कौसल्याकुलभूषणं रघुपतिं श्रीरामचन्द्रं भजे ॥ ८७ ॥

राम त्वच्चरणारविन्दममलं श्रीरामपारायणं
भक्तत्राणपरायणं भवभयत्राणप्रवीणं सदा ।
तन्मे कर्तुमुपायनं मम मनः प्रीतिं दिश सर्वदा [दिश त्वं सदा]
दीनं दीनशरण्य पूर्णकृपया सीतापते पाहि माम् ॥ ८८ ॥

रामो नः कुलदैवतं सकरुणं रामं भजे सादरं
रामेणेशधनुः क्षणेन दलितं रामाय तस्मै नमः ।
रामान्नाशमवाप राक्षसकुलं रामस्य दासोऽस्म्यहं
रामे तिष्ठति विश्वमेतदखिलं हे राम(रक्षस्व)संरक्ष माम् ॥ ८९ ॥

रामो रक्षतु लक्ष्मणेन सहितो रामं सरामं भजे
रामेणैव हि रक्षिताः सुरगणा रामाय तस्मै नमः ।
रामान्नापरमस्ति दैवतमहो रामस्य दासोऽस्म्यहं
रामे तिष्ठतु मानसं मम सदा हे राम तुभ्यं नमः ॥ ९० ॥

दिव्यस्यन्दनमध्यगं घनरणच्चापान्वितं भीषणं
कालाग्निप्रतिमानबाणकलितं घोरास्त्रतूणीद्वयम् ।
सौमित्र्यर्कजरावणानुजमरुत्पुत्रादिसंसेवितं
रामं राक्षसकोटिवीरहरणं श्रीरामचन्द्रं भजे ॥ ९१ ॥

राजीवायतलोचनं रघुपतिं नीलोत्पलश्यामलं
मुक्तालङ्कृतमण्डपे सुललिते सौवर्णके पुष्पके ।
आसीनं नवरत्नकाञ्चनलसत्सिंहासने साम्बुजे
सीतालक्ष्मणवायुसूनुसहितं श्रीरामचन्द्रं भजे ॥ ९२ ॥

कर्पूराङ्गविलेपनं रघुवरं राजीवनेत्रान्वितं
कस्तूरीतिलकाङ्कितं करिवरप्रत्येयमेकं प्रभुम् ।

कन्दर्पायुतकोटिसुन्दरतनुं कारुण्यपाथोनिधिं
कान्ताकाममदमप्रमेयमनघं सीतासमेतं भजे ॥ ९३ ॥

पूर्वं रामतपोवनानुगमनं हत्वा मृगं काञ्चनं
वैदेहीहरणं जटायुमरणं सुग्रीवसम्भाषणम् ।
वालीनिग्रहणं समुद्रतरणं लङ्कापुरीदाहनं
पश्चाद्रावणकुम्भकर्णनिधनं ह्येतद्धि रामायणम् ॥ ९४ ॥

राकेन्दुप्रतिमाननस्य महिमा हा केन वा वर्ण्यते
लोके यः स दयापरोऽजनि महान् काकेऽपि सान्द्रागसि ।
एकेनैव शरेण येन समरे नाकेशसूनुर्हतः
शोकेनाकुलचेतसां भुवि सतां साकेतवासी गतिः ॥ ९५ ॥

यन्नामैव सहस्रनामसदृशं यत्कर्म कैवल्यदं
यद्विद्या हृदयाम्बुजेषु विदुषामानन्दसन्दायिनी ।
यन्मूर्तिर्विजयान्विता त्रिजगतीरक्षाविधौ दीक्षिता
तं कल्याणगुणान्वितं प्रतिदिनं श्रीरामचन्द्रं भजे ॥ ९६ ॥

मैथिल्या नगरे विवाहसमये कल्याणवेद्यन्तरे
श्रीमन्तौ तपनीयरत्नखचिते पीठे व[ल]सन्तौ शुभौ ।
श्रीमन्तौ निगमार्थतत्त्वविदुषामाशीर्गिरा पावनौ
पायास्तां च वधूवरौ सुललितौ श्रीजानकीराघवौ ॥ ९७ ॥

यत्पादः सुरसिन्धुवाससदनं यन्नाभिजातोऽब्जभूः
यः साकेतनिकेतनं यदुदरं लोकैकशय्यागृहम् ।
यद्वक्षः कमलाविलासभवनं यन्नेत्रयुग्मं दया-
राश्या[लास्या]गारमखण्डमङ्गलनिधिः पायात् स नो राघवः ॥ ९८ ॥

कौसल्या जननी पिता दशरथः सल्लक्ष्मणो लक्ष्मणः
शत्रुघ्नो भरतोऽनुजो जनकजा जाया वसिष्ठो गुरुः ।
सुग्रीवश्च विभीषणः प्रियसखौ दूतो हनूमान् महान्
सायोध्या नगरी सुतौ कुशलवौ श्रीरामदासा वयम् ॥ ९९ ॥

रक्षोघ्नं रणरागिणं रविसमं रुद्रप्रियं रक्षकं
रूपैकाभरणं रुषादिरहितं रुक्माङ्गदाराधितम् ।
रोचिष्णुं रथिनं रमापतिसमं राज्यप्रदं राघवं
रामं राजशिरोमणिं रघुपतिं श्रीरामचन्द्रं भजे ॥ १०० ॥

साकेते शरदिन्दुकुन्त[द]धवले सौधे महामण्डपे
पर्यस्तागरुधूपगन्धललिते कर्पूरदीपोज्ज्वले ।

सुग्रीवाङ्गदजाम्बवत्परिवृतं सौमित्रिणा सेवितं
लीलामानुषविग्रहं रघुपतिं सीतासमेतं भजे ॥ १०१ ॥

वामाङ्के जनकात्मजां पदतले वायोः सुतं लक्ष्मणं
पश्चाच्छत्रुहरं विभीषणयुतं सुग्रीवमग्रे स्थितम् ।
पार्श्वे कैकयिनन्दनं तदितरे शत्रुघ्नसंसेवितं
रामं नीरदनीलमञ्जुलतनुं सीतासमेतं भजे ॥ १०२ ॥

वामे भूमिसुता पुरस्तु हनुमान् पश्चात्सुमित्रासुतः
शत्रुघ्नो भरतश्च पार्श्वदलयोर्वाय्वादिकोणेषु च ।
सुग्रीवश्च विभीषणश्च युवराट् तारासुतो जाम्बान्
मध्ये नीलसरोजकोमलरुचिं रामं भजे श्यामलम् ॥ १०३ ॥

कालाम्भोधरकान्तिकान्तमनिशं वीरासनाध्यासितं
मुद्रां ज्ञानमयीं दधानमपरं हस्ताम्बुजं जानुनि ।
सीतां पार्श्वगतां सरोरुहकरां विद्युन्निभां राघवं
पश्यन्तं मकुटाङ्गदादिविविधाकल्पोज्ज्वलाङ्गं भजे ॥ १०४ ॥

वैदेहीसहितं सुरद्रुमतले हैमे महामण्डपे
मध्येपुष्पकमासने मणिमये वीरासने सुस्थितम् ।
अग्रे वाचयति प्रभञ्जनसुते तत्त्वं मुनिभ्यः परं
व्याख्यान्तं भरतादिभिः परिवृतं रामं भजे श्यामलम् ॥१०५॥

वैदेहीकुचमण्डलोपरि लसत्माणिक्यहारावली-
मध्यस्थोपलनीलकोमलरुचिं नीलोत्पलश्यामलम् ।
कन्दर्पायुतकोटिसुन्दरतनुं कोदण्डदीक्षागुरुं
कौलल्याकुलभूषणं रघुवरं रामं भजे श्यामलम् ॥ १०६ ॥

वैदेहीमधिरोप्य जातपुलकां लज्जावतीं सुस्थितां
काञ्चीकङ्कणहारनूपुरलसत्कर्णावतंसोज्ज्वलाम् ।
कस्तूरीघनसारचर्चितकुचां चन्द्राननां जानकीं
कन्दर्पायुतसुन्दरं रघुपतिं रामं भजे श्यामलम् ॥ १०७ ॥

वैदेहीमधिरोप्य जातपुलकां वामाङ्कमारोहिणीं
वामेन स्तनचूचुकं पुलकितं वामं करेण स्पृशन् ।
तत्त्वं दक्षिणपाणिना कलितया धीमुद्रया बोधयन्
रामो मारुतिसेवितः स्फुरतु मे साम्राज्यसिंहासने ॥ १०८ ॥

उत्फुल्लामलकोमलोत्पलदलश्यामाय रामाय नः
कामाय प्रथमाय निर्मलगुणारामाय रामात्मने ।

ध्यानारूढमुनीन्द्रमानससरोहंसाय संसारवि-
ध्वंसाय स्फुरदोजसे रघुकुलोत्तंसाय पुंसे नमः ॥ १०९ ॥

क्षीराम्भोनिधिमध्यवर्तिनिशिता. . . . . सुवर्णाम्बरे
रक्तोल्लोचनहेमपद्मपटले जाम्बूनदे मण्डपे ।
तेजोधामनि पुष्पके रविनिभे माणिक्यसिंहासने
हेमाम्भोरुहकर्णिकान्तरतले वीरासने सुस्थितम् (?) ॥ ११० ॥

ये शृण्वन्ति पठन्ति रामचरितं ये भाग्यवन्तः सदा
धीरोदात्तरघूत्तमस्य चरणौ ध्यायन्ति ये मानसे ।
ये कुर्वन्ति समस्तधर्मनिचयं रामस्य सुप्रीतये
तेषां सर्वमनोरथान् वितनुते साक्षाद्रघूणां पतिः ॥ १११ ॥

रामं रामानुजं सीतां भरतं भरतानुजम् ।
सुग्रीवं वायुसूनुं च प्रणमामि पुनः पुनः ॥ ११२ ॥

यन्नामधेयं म्रियमाण आतुरः
पतन् स्खलन् वाप्यवशो गृणन्नरः ।
विमुक्तकर्मार्गल उत्तमां गतिं
प्राप्नोति यक्ष्यन्ति न तं कलौ जनाः ॥ ११३ ॥
॥ इति श्रीरामशतकं सम्पूर्णम् ॥

---

१५. ॥ अथ श्रीमङ्गलश्लोकरामायणम् ॥

सर्वलोकशरण्याय साकेतपुरवासिने ।
सत्सेविताय रामाय ससीतायास्तु मङ्गलम् ॥ १ ॥

कौसल्यायां दशरथाज्जाताय परमात्मने ।
सदा भरतसौमित्रिशत्रुघ्नेशाय मङ्गलम् ॥ २ ॥

कौशिकक्रतुरक्षार्थं कृत्वा मारीचमर्दनम् ।
अहल्यापापनाशाय रघुनाथाय मङ्गलम् ॥ ३ ॥

जित्वा [भङ्क्त्वा] शैवं पुरा चापं प्राप्य सीतामनुत्तमम् ।
अयोध्यामागतायास्तु गुणपूर्णाय मङ्गलम् ॥ ४ ॥

पितुः सत्यप्रतिज्ञायै कैकेय्या वचनादपि ।
चित्रकूटनिवासाय सीतारामाय मङ्गलम् ॥ ५ ॥

पादुके भरते याते दत्त्वा राज्यस्य पालने ।
दण्डकारण्यवासाय धैर्ययुक्ताय मङ्गलम् ॥ ६ ॥

हत्वा विराधं बलिनं मुनीनां भावितात्मनाम् ।
दत्ताभयाय रामाय पद्माक्षायास्तु मङ्गलम् ॥ ७ ॥

चतुर्दशसहस्राणां रक्षसां क्रूरकर्मणाम् ।
खरदूषणमुख्यानां हारिणेऽस्तु सुमङ्गलम् ॥ ८ ॥

सीतादर्शनयुक्ताय गृध्रमोक्षप्रकाशिने ।
कबन्धहारिणे तस्मै राघवायास्तु मङ्गलम् ॥ ९ ॥

शबर्या दत्तपूजाय सेविताय हनूमता ।
सुग्रीवकृतसख्याय धैर्ययुक्ताय मङ्गलम् ॥ १० ॥

वालिनं बलिनं हत्वा सुग्रीवमभिषिच्य च ।
वर्षरात्रनिवासाय रामचन्द्राय मङ्गलम् ॥ ११ ॥

कालातिक्रमणाच्चैव कुपिताय महात्मने ।
आगते सति सुग्रीवे प्रसन्नायास्तु मङ्गलम् ॥ १२ ॥

अगुङ्लीयप्रदात्रे च हनूमति महात्मने ।
सीतां दृष्ट्वागते तस्मिन् हर्षयुक्ताय मङ्गलम् ॥ १३ ॥

अशोकवनिकामध्ये श्रुत्वा सीतां हनूमता ।
सुग्रीवकृतयानाय रघुनाथाय मङ्गलम् ॥ १४ ॥

अथागतं महात्मानमभिषिच्य विभीषणम् ।
कृतसागरबन्धाय सानुजायास्तु मङ्गलम् ॥ १५ ॥

सेतुना सुखमासाद्य लङ्कां रावणपालिताम् ।
सुवेलगिरिवासाय रणधीराय मङ्गलम् ॥ १६ ॥

सुग्रीवेण दशग्रीवे मुष्टियुद्धेन मूर्छिते ।
इन्द्रजिन्नागबद्धाय विमुक्तायास्तु मङ्गलम् ॥ १७ ॥

धूम्राक्षे वायुपुत्रेण वज्रदंष्ट्रेऽगदेन च ।
प्रहस्ते नीलनिहते हर्षयुक्ताय मङ्गलम् ॥ १८ ॥

नयत्यौषधिशैलेन्द्रं हनूमति महात्मने ।
ब्रह्मास्त्रबन्धयुक्ताय विमुक्तायास्तु मङ्गलम् ॥ १९ ॥

रावणिं च हतं श्रुत्वा लक्ष्मणेन महाबलम् ।
निहत्य मकराक्षं च प्रसन्नायास्तु मङ्गलम् ॥ २० ॥

जित्वा रावणकोटीरं कुम्भकर्णं निहत्य च ।
अतिकायं हतं श्रुत्वा प्रीतियुक्ताय मङ्गलम् ॥ २१ ॥

ततो मूलबलं हत्वा रावणं च महाबलात् ।
विजयं प्राप्य हृष्टाय रघुनाथाय मङ्गलम् ॥ २२ ॥

ततोऽग्निवचनात् सीतां प्राप्य हृष्टां यशस्विनीम् ।
ब्रह्मस्तुत्या प्रहृष्टाय रामभद्राय मङ्गलम् ॥ २३ ॥

विभीषणं महात्मानं लङ्कायामभिषिच्य च ।
वानरै राक्षसैः सार्धं पुष्पकस्थाय मङ्गलम् ॥ २४ ॥

मदनाकृतये तस्मै मधुरापुरवासिने ।
मनुवंशप्रदीपाय मानवेन्द्राय मङ्गलम् ॥ २५ ॥

प्राप्यायोध्यां च भरतं गङ्गातोयैः सुगन्धिभिः ।
अभिषिक्ताय रामाय ससीतायास्तु मङ्गलम् ॥ २६ ॥

मधुरापुरवासाय वसुदेवसुतप्रभुः (?) ।
श्रीराममङ्गलं नित्यं शृण्वतां सुकृतं भवेत् ॥ २७ ॥

एवं वाल्मीकिना प्रोक्तं रामायणकथामृतम् ।
यः पठेद्रामचरितं सर्वपापैः प्रमुच्यते ॥ २८ ॥

अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः ।
अधनाः सधनाः सन्तु जीवन्तु शरदां शतम् ॥ २९ ॥

॥ इति श्रीमङ्गलश्लोकरामायणं संपूर्णम् ॥

---

१६. ॥ अथ श्रीचिरञ्जीविरामायणम् ॥

पायात् क्षीराब्धिशायी कमलभवनुतः कोसलेन्द्रस्य पुत्रो
रामः सौमित्रियुक्तः कुशिकसुतगिरा ताटकाप्राणहारी ।
यज्ञं निर्वर्त्य गङ्गासुचरितमुदितः पावयंस्तामहल्यां
सीतामुद्वाह्य जित्वा पथि भृगुतनयं प्राप्य हर्षादयोध्याम् ॥ १ ॥

श्रीरामं नौमि कैकेय्यभिलषितवरात् खिन्नमालोक्य तातं
तद्वाचा त्यक्तराज्यं झटिति वनगतं मैथिलीलक्ष्मणाभ्याम् ।
स्वर्गस्थे राज्ञि शोकात् कृतनुतिभरतप्रार्थनात् पादुके स्वे
दत्त्वास्मै तन्निवृत्त्या स्थितमनुजयुतं सेवितं चित्रकूटे ॥ २ ॥

हत्वारण्ये विराधं मुनिनिकरमुदे पञ्चवट्यामुषित्वा
वैरूप्यात् शूर्पणख्या[:]निशित[कुपित]खरमुखान् ध्वंसयित्वार्धयामम् ।
मारीचं मर्दयित्वा दशवदनहृतां तत्र सीतामदृष्ट्वा
दग्ध्वा क्रुद्धं कबन्धं शबरिवनितया पूजितं राममीडे ॥ ३ ॥

पम्पातीरे हनूमत्प्रतरवचनादृश्यमूकं च गत्वा
कृत्वा सुग्रीवसख्यं निशितशरवरैः सप्तसालांश्च भित्त्वा ।

हत्वा सुत्रामपुत्रं दिनकरजनुषस्तस्य राज्यं च दत्त्वा
तेनानीतैः कपीशैर्विदित[विचित]सकलभूमण्डलं राममीडे ॥ ४ ॥
सेतुं बध्द्वा समुद्रे सकलबलयुतं रावणं कुम्भकर्णं
हत्वा तत्पुत्रवर्गं तदनुजमभिषिच्याथ लङ्काधिनाथम् ।
सीतां लब्ध्वाग्निशुद्धां सकलसुरनुतं पुष्पयानाधिरूढं
सुग्रीवाद्यैरुपेतं रघुपतिमनिशं प्राप्तराज्यं नमामि ॥ ५ ॥
सकृदपि यदि रामेत्युच्चरन् यस्तु मर्त्यः
सकलदुरितसङ्घैः संयुतो वापि नूनम् ।
न निवसति स मातुर्गर्भवासी कदाचि-
न्निवसति हरिलोके नास्ति सन्देहलेशः ॥ ६ ॥

॥ इति श्रीचिरञ्जीविरामायणं सम्पूर्णम् ॥

---

१७. ॥ अथ श्रीरामाक्षरमालास्तोत्रम् ॥

अखिलाधारं श्रीरामं
आगमविनुतं श्रीरामम् ।
इष्टरक्षणं श्रीरामं
ईप्सितफलदं श्रीरामम् ॥ १ ॥

उग्रपूजितं श्रीरामं
ऊर्जितफलदं श्रीरामम् ।
ऋषिगणवन्द्यं श्रीरामं
ॠवरपक्षं श्रीरामम् ॥ २ ॥

ऌचयस्तोत्रं श्रीरामं
ॡ[ऌ]ननताघं श्रीरामम् ।
एकविक्रमं श्रीरामं
ऐहिकफलदं श्रीरामम् ॥ ३ ॥

ओंनुतिफलदं श्रीरामं
औदार्यवरं श्रीरामम् ।
अद्भुत[अंबुद]रूपं श्रीरामं
आमुष्मिकदं श्रीरामम् ॥ ४ ॥

कम्बुग्रीवं श्रीरामं
खरसंहारं श्रीरामम् ।
गजराडुरदं श्रीरामं
घनसदृशाङ्गं श्रीरामम् ॥ ५ ॥

[1]ङज्युतिकरणं श्रीरामं
चटुलाम्बधरं श्रीरामम् ।
छन्दोविनुतं श्रीरामं
जलजाताक्षं श्रीरामन् ॥ ६ ॥

झषवररूपं श्रीरामं
[2]ञी[ञे]शात्मस्थं श्रीरामम्
[3]टीदृश[टिट्टिभ]हस्तं श्रीरामं
[4]ठपूजाङ्घ्रिं श्रीरामम् ॥ ७ ॥

[5]डापतिनाशं श्रीरामं
[6]ढंमन्त्रहरं श्रीरामम् ।
[7]णक्रोधात्मं श्रीरामं
तपनान्वयजं श्रीरामम् ॥ ८ ॥

[8]थपरिपालं श्रीरामं
दशरथबालं श्रीरामम् ।
धरणीलोलं श्रीरामं
नरहरिरूपं श्रीरामम् ॥ ९ ॥

---

1. ङः इति शिवस्य नाम । तस्य ज्युतिः द्युतिः, तस्याः कारणम् ।
2. ञः इति शुक्रस्य नाम । तस्य ईशः अधिदेवता अम्बिका, तदात्मस्थम् ।
3. टिट्टिभः पक्षिविशेषः ।
4. ठः इति शिवस्य नाम । तस्य पूजा यस्मिन् सः ठपूजः । ठपूजः अङ्घ्रिः यस्य तम् ।
5. डा राक्षसी । तासां पतयः राक्षसाः, तेषां नाशः येन, तम् ।
6. ढः सर्पः, तस्य मन्त्रः नागास्त्रम्, तस्य हरम् ।
7. णः न क्रोधः, अक्रोधात्मानम् ।
8. थं भयम्, भयत्रातारम् ।

परमपावनं श्रीरामं
फल्गुनसुहृदं श्रीरामम् ।
बलिमददलनं श्रीरामं
[1]भण्डनसुदृशं श्रीरामम् ॥ १० ॥

मन्मथजनकं श्रीरामं
यमिजनवेद्यं श्रीरामम् ।
रघुकुलतिलकं श्रीरामं
लक्ष्मीलोलं श्रीरामम् ॥ ११ ॥

वदनजितेन्दुं श्रीरामं
शङ्करविनुतं श्रीरामम् ।
पदपदकान्तं श्रीरामं
सरसिजनाभं श्रीरामम् ॥ १२ ॥

हतदेवारिं श्रीरामं
लक्ष्मणाग्रजं श्रीरामम् ।
वनजातदृशं श्रीरामं
शफरसुनयनं श्रीरामम् ॥ १३ ॥

षड्वर्णज्ञं श्रीरामम्
सरसिजनयनं श्रीरामं ।
हतदेवारिं श्रीरामं
[2]क्षरणविरहितं श्रीरामम् ॥ १४ ॥

॥ इति श्रीरामाक्षरमालास्तोत्रं सम्पूर्णम् ॥

---

1. भण्डनं युद्धम्, तस्मिन् दक्षम् ।
2. क्षरणं स्वेदः, तद्रहितम् ।

१८. ॥ अथ श्रीरामवर्णमालिकास्तोत्रम् ॥

अन्तस्समस्तजगतां यमनुप्रविष्ट-
माचक्षते मणिगणेष्विव सूत्रमार्याः ।
तं केलिकल्पितरघूद्वहरूपमाद्यं
पङ्केरुहाक्षमनिशं शरणं प्रपद्ये ॥ १ ॥

आम्नायशैलशिखरैकनिकेतनाय
वाल्मीकिवाग्जलनिधिप्रतिबिम्बिताय ।
कालाम्बुदाय करुणारसमेदुराय
कस्मैचिदस्तु मम कार्मुकिणे प्रणामः ॥ २ ॥

इन्दुप्रसादमवतंसयता तदीयं
चापं करे हुतवहं वहता हरेण ।
शङ्के जगत्त्रयमनुग्रहनिग्रहाभ्यां
संयोज्यते रघुपते समयान्तरेषु ॥ ३ ॥

ईदृग्विधस्त्वमिति वेद न सोऽपि वेदः
शक्तोऽन्तिकस्थितमवेक्षितुमुत्तमाङ्गे ।
श्रोतुं क्षमं न कुदृशेक्षितुमप्यतस्त्वां
सर्वे विदन्तु कथमीश कथं स्तुवन्तु ॥ ४ ॥

उष्णांशुबिम्बमुदधिस्मयघस्मरान्त्र
प्रावा च तुल्यमजनिष्ट गृहं यथा ते ।
वाल्मीकिवागपि मदुक्तिरपि प्रभुं त्वां
देव प्रशंसति तथा यदि कोऽत्र दोषः ॥ ५ ॥

ऊढः पुरासि विनतान्वयसम्भवेन
देव त्वया किमधुनापि तथा न भाव्यम् ।
पूर्वे जना मम विनेमुरसंशयं त्वां
जानासि राघव तदन्वयसम्भवं माम् ॥ ६ ॥

ऋक्षं प्लवङ्गमपि रक्षसि चेन्महात्मन्
विप्रेषु किं पुनरथापि न विश्वसाम ।

अत्रापराध्यति किल [1]प्रथमद्वितीयौ
वर्णौ तवौदनतया [2]निगमो विवृण्वन् ॥ ७ ॥

नृणां न केवलमसि त्रिदिवौकसां त्वं
राजा यमार्कमरुतोऽपि यतस्त्रसन्ति ।
दीनस्य वाङ्मम तथा वितते तव स्यात्
कर्णे रघूद्वह यतः ककुभोऽपि जाताः ॥ ८ ॥

कृष्णामपि व्यसनिनीं भवितव्यतां मे
नाथान्यथा कुरु तव प्रभुतां दिदृक्षोः ।
चक्रे शिलापि तरुणी भवता तदास्तां
मायापि यद्घटयते तव दुर्घटानि ॥ ९ ॥

एकं भवन्तमृषयो विदुरद्वितीयं
जानामि कार्मुकमहं तु तव द्वितीयम् ।
श्रुत्याश्रिता जगति यद्गुणघोषणा सा
दूरीकरोति दुरितानि समाश्रितानाम् ॥ १० ॥

ऐशं शरासमचलोपममिक्षुवल्ली-
भङ्गं बभञ्ज किल यस्तव बाहुदण्डः ।
तस्य त्वशीतकरवंशवतंस शंस
किं दुष्करो भवति मे विधिपाशभङ्गः ॥ ११ ॥

ओजस्तव प्रहितशेषविषाग्निदग्धैः
स्पष्टं जगद्भिरुपलभ्य भयाकुलानाम् (?) ।
गीतोक्तिभिस्त्वयि निरस्य मनुष्यबुद्धिं
देव स्तुतोऽसि विधिविष्णुवृषध्वजानाम् ॥ १२ ॥

औत्कण्ठ्यमस्ति दशकण्ठरिपो ममैकं
द्रक्ष्यामि तावकपदाम्बुरुहं कदेति ।
अप्येति कर्म निखिलं मम यत्र दृष्टे
लीनाश्च यत्र यतिभिः सह मत्कुलीनाः ॥ १३ ॥

अंभोनिधावबधिमत्यवकीर्य बाणान्
किं लब्धवानसि ननु श्वशुरस्तवायम् ।
इष्टापनेतुमथवा यदि बाणकण्डू-
र्देवायमस्यनवधिर्मम दैन्यसिन्धुः ॥ १४ ॥

---

1. = ब्राह्मणक्षत्त्रियौ ।
2. "यस्य ब्रह्म च क्षत्त्रं च उभे भवत ओदनः" इति कठवल्लिरनुसन्धेया ।

अश्रान्तमर्हति तुलाममृतांशुबिम्बं
भग्नाम्बुजद्युतिमदेन भवन्मुखेन ।
अस्मादभूदनल इत्यकृतोक्तिरीश
सत्या कथं भवतु साधुविवेकभाजाम् ॥ १५ ॥

कल्याणमावहतु नः कमलोदरश्री-
रासन्नवानरभटौघगृहीतशेषः ।
श्लिष्यन् मुनीन् प्रणतदेवशिरःकिरीट-
दाम्नि स्खलन् दशरथात्मज ते कटाक्षः ॥ १६ ॥

खंवायुरग्निरुदकं पृथिवी च शब्दः
स्पर्शश्च रूपरसगन्धमपि त्वमेव ।
..... दयया त्मबन्धो
धत्से वपुः शरशरासभृदब्दनीलम् ॥ १७ ॥

गङ्गा पुनाति रघुपुङ्गव यत्प्रसूता
यद्रेणुना च पुपुवे यमिनः कलत्रम् ।
तस्य त्वदङ्घ्रिकमलस्य निषेवया स्यां
पूतो यथा पुनरघेऽपि तथा प्रसीद ॥ १८

घण्टाघणंघणितकोटिशरासनं ते
लुण्टाकमस्तु विपदां मम लोकनाथ ।
जिह्वालुतां वहति यद्भुजगो रिपूणाम्
उष्णैरसृग्भिरुदरम्भरिणा शरेण ॥ १९ ॥

प्राङ्मत्स्यवाङसि परेश तथासि तिर्यङ्
भ्रमः किमन्यदखिला अपि जन्तवोऽसि ।
एकक्रमेपि तव वा भुवि न म्रियन्ते (?)
मन्दस्य राघव सहस्व ममापराधम् ॥ २० ॥

चण्डानिलव्यतिकरक्षुभिताम्बुवाह-
दम्भोलिपातमिव दारुणमन्तकालम् ।
स्मृत्वापि संभविनमुद्विजते न धन्यो
लब्ध्वा शरण्यमनरण्यकुलेश्वरं त्वाम् ॥ २१ ॥

छद्म निजं कुहनया मृगरूपभाजो
नक्तंचरस्य न किमाविरकरि रूपम् ।

त्वत्पत्निणापि रघुवीर ममाद्य माया-
गूढस्वरूपविवृतौ तव कः प्रयासः ॥ २२ ॥

जन्तोः किल त्वदभिधा मम कर्णिकायां
कर्णेजपन् हरति कश्चन पञ्चकोशान् ।
इत्यामनन्ति रघुवीर ततो भवन्तं
राजाधिराज इति विश्वसिमः कथं वा ॥ २३ ॥

झङ्कारिभृङ्गकमलोपमितं पदं ते
चारुस्तवप्रवणचारणकिन्नरौघम् ।
जानामि राघव जलाशयवासयोग्यं
स्वैरं वसेत्तदधुनैव जलाशये मे ॥ २४ ॥

ज्ञानेन मुक्तिरिति निश्चितमागमज्ञै-
र्ज्ञानं क मे भवतु दुस्त्यजवासनस्य ।
देवाभयं वितर किं नु सकृत्प्रपत्त्या
मह्यं न विस्मर पुरैव कृतां प्रतिज्ञाम् ॥ २५ ॥

टङ्कारमीश भवदीयशरासनस्य
ज्यास्फालनेन जनितं निगमं प्रतीमः ।
येनैव राघव भवानवगम्य मास-
त्रासं निरस्य सुखमातनुते बुधानाम् ॥ २६ ॥

ठात्कृत्य मण्डलमखण्डि यदुष्णभानो-
र्देव त्वदस्त्रदलितैर्युधि यातुधानैः ।
शङ्के ततस्तव पदं विदलय्य वेगा-
त्तैरद्भुतं प्रतिकृतिर्विदधे वधस्य ॥ २७ ॥

डिम्भस्तवास्मि रघुवीर तथा दयस्व
लभ्यं यथा कुशलवत्वमपि क्षितौ मे ।
किञ्चिन्मनो मयि निधेहि तव क्षतं किं
व्यर्था भवत्वमनसं गृणती श्रुतिस्त्वाम् ॥ २८ ॥

ढक्कां त्वदीययशसा मधुनापि शृण्मः
प्राचेतसस्य भणितिं भरताग्रजन्मन् ।
सत्ये यशस्तव शृणोति मृकण्डुसूनो-
र्धातापि यतो जगति को हि भवादृशोऽन्यः ॥ २९ ॥

त्राणं समस्तजगतां तव किं न कार्यं
सा किं न तत्र करणं करुणा तवैव ।
आख्याति कार्यकरणे तव नेति या वाङ्-
मुख्या न सा रघुपते भवति श्रुतीनाम् ॥ ३० ॥

तत्त्वंपदे पदमसीति च यानि देव
तेषां यदस्यभिलषन्नुपलब्धुमर्थान् ।
सेवे पदद्वयमतो मृदुलं न वादौ
यद्दारुणैरपि ततो भवदर्थलाभः (?) ॥ ३१ ॥

प्रोथं यदुद्वहसि भूमिवहैकदंष्ट्रं
विश्वप्रभो विघटिताभ्रघटाः सटा वा ।
रूपं तदुद्भटमपास्य रुचासि दिष्ट्या
त्वं शम्बरारिरपि कैतवशम्बरारिः (?) ॥ ३२ ॥

दग्ध्वा निशाचरपुरीं प्रथितस्तवैको
भक्तेषु दानवपुरत्रितयं तथान्यः ।
त्वच्चाशराव्युरसमस्यगुणैः प्रभो मे
पुर्यष्टकप्रशमनेन लभस्व कीर्तिम् (?) ॥ ३३ ॥

धत्ते शिरांसि दश यस्सुकरो वधोऽस्य
किं न त्वया निगमगीतसहस्रमूर्ध्ना ।
मोहं ममामितपदं यदि देव हन्याः
कीर्तिस्तदा तव सहस्रपदो बहुः स्यात् ॥ ३४ ॥

नम्रस्य मे भव विभो स्वयमेव नाथो
नाथो भव त्वमिति चोदयितुं बिभेमि ।
येन स्वसा दशमुखस्य नियोजयन्ती
नाथो भव त्वमिति नासिकया विहीना ॥ ३५ ॥

पर्याकुलोऽस्मि किल पातकमेव कुर्वन्
दीनं ततः करुणया कुरु मामपापम् ।
कर्तुं रघूद्वह नदीनमपापमुर्व्यां
शक्तस्त्वमित्ययमपैति न लोकवादः ॥ ३६ ॥

फल्गूनि यद्यपि फलानि न लिप्सते मे
चेतः प्रभो तदपि नो भजति प्रकृत्या ।

मूर्त्यन्तरं व्रजवधूजनमोहनं ते
जानाति फल्गु न फलं भुवि यत्प्रदातुम् ॥ ३७ ॥

बर्हिश्छदग्रथितकेशमनर्घवेष-
मादाय गोपवनिताकुचकुङ्कुमाङ्कम् ।
ह्रीणो न राघव भवान् यदतः प्रतीमः
पत्न्या ह्रिया विरहितोऽसि पुरा श्रियेव ॥ ३८ ॥

भद्राय मेऽस्तु तव राघव बोधमुद्रा
विद्रावयन्त्यखिलमान्तरमन्धकारम् ।
मन्त्रस्य ते परिपुनन्ति जगद्यथाष-
डष्टाक्षराण्य[पि तथैव]विवृण्वती सा ॥ ३९ ॥

मन्दं निधेहि हृदि मे भगवन्नटव्यां
पाषाणकण्टकसहिष्णु पदाम्बुजं ते ।
अङ्गुष्ठमात्रमथवात्र निधातुमर्ह-
स्याक्रान्तदुन्दुभितनूकठिनास्थिकूटम् ॥ ४० ॥

यज्ञेन देव तपसा यदनाशकेन
दानेन च द्विजगणैर्विविदिष्यसे त्वम् ।
भाग्येन मे जनितृषा तदिदं यतस्त्वां
चापेषुभाक् परमबुध्यत जामदग्न्यः ॥ ४१ ॥

रम्योज्ज्वलस्तव पुरा रघुवीर देहः
कामप्रदो यदभवत् कमलालयायै ।
चित्रं किमत्र चरणाम्बुजरेणुरेखा
कामं ददौ न मुनये किमु गौतमाय ॥ ४२ ॥

लङ्केशवक्षसि निविश्य यथा शरस्ते
मन्दोदरीकुचतटीमणिहारचोरः ।
शुद्धे सतां हृदि गतस्त्वमपि प्रभो मे
चित्ते तथा हर चिरोवनतामविद्याम् ॥ ४३ ॥

वन्दे तवाङ्घ्रिकमलं श्वशुरं पयोधे-
स्तातं भुवश्च रघुपुङ्गव रेखया यत् ।
वज्रं बिभर्ति भजदार्तिगिरिं विभेत्तुं
विद्यां नताय वितरेयमिति ध्वजं च ॥ ४४ ॥

शम्भुः स्वयं निरदिशद्गिरिकन्यकायै
यन्नाम राम तव नामसहस्रतुल्यम् ।
अर्धं भवन्तमपि तद्वहदेकमेव
चित्रं ददाति गृणते चतुरः किलार्थान् ॥ ४५ ॥

षट् ते विधिप्रभृतिभिः समवेक्षितानि
मन्त्राक्षराणि ऋषिभिर्मनुवंशकेतो ।
एकेन यानि गुणितान्यपि मानसेन
चित्रं नृणां त्रिदशतामुपलम्भयन्ति ॥ ४६ ॥

सर्गस्थितिप्रलयकर्मसु चोदयन्ती
माया गुणत्रयमयी जगतो भवन्तम् ।
ब्रह्मेति विष्णुरिति रुद्र इति त्रिधा ते
नाम प्रभो दिशति चित्रमजन्मनोऽपि ॥ ४७ ॥

हंसोऽसि मानसचरो महतां यतस्त्वं
संभाव्यते कील ततस्तव पक्षपातः ।
मय्येनमर्पय न चेद्रघुनन्दन... ...
जिष्णोरपि त्रिभुवने समव... ... ॥ ४८ ॥

लक्ष्मीर्यतोऽजनि यथैव जलाशयाना-
मेको रुषा तव तथा कृपयापि कार्यः ।
अन्योऽपि कश्चिदिति चेदहमेव वर्ते
तादृग्विधस्तपनवंशमणे किमन्यैः ॥ ४९ ॥

क्षन्तुं त्वमर्हसि रघूद्वह मेऽपराधान्
सर्वंसहा ननु वधूरपि ते पुराणी ।
वासालयं च ननु हृत्कमलं मदीयं
कान्तापरापि न हि किं कमलालया ते ॥ ५० ॥

इत्थं मम स्तुवदमर्त्यनिगद्यमान-
त्र्यन्तमन्त्रमुखरीकृतपादपीठ ।
राजाधिराज कृपया रघुवीर वर्ण-
मालास्तवं त्वमवकर्णयितुं प्रसीद ॥ ५१ ॥

॥ इति श्रीरामवर्णमालिकास्तोत्रं सम्पूर्णम् ॥

१९. ॥ अथ श्रीरामकर्णामृतम् ॥

दिशतु स कुशलं जिते दशास्ये
विधिविहितस्तुतिवेदितस्वरूपः ।
उपदिशति शिवो नृणां यदीयं
मनुमविमुक्तपुरे विमुक्तिहेतोः ॥ १ ॥

विहितविधिमपास्यता निषिद्धा-
न्यपि चरताप्यकृताक्षनिग्रहेण ।
यदघमुपचितं मया यतिष्ये
रघुवरसंस्मरणेन तन्निमार्ष्टुम् ॥ २ ॥

चिरपरिचितया मनो विकृष्टं
दिशि दिशि वासनया न मे नियाम्यम् ।
इति कवनपथे तवार्य राम
स्मरणविधावनघे करोम्युपायान् ॥ ३ ॥

प्रकृतिरिति सरस्वतीति लक्ष्मी-
रिति गिरिजेति जगत्त्रयीति वा याम् ।
गदति मुनिगणः कवित्वसिद्धयै
कथमपि तां कलये विदेहकन्याम् ॥ ४ ॥

मधुरभणितये पतिव्रतानां
मकुटमणिं कलये महीकुमारीम् ।
पतिकृतरिपुपातनप्रतिज्ञा-
दलनभयादहितेऽप्यदत्तशापाम् ॥ ५ ॥

हृदय विषयमेव सेवसे किं
यदयमुदग्रविषोपमः क्रमेण ।
मदयति च निहन्ति च प्रकामं
तदयनमेत्य गिरा भजस्व रामम् ॥ ६ ॥

रघुवरचरणारविन्दभक्ति-
च्छलमकरन्दनिरन्तराभिषिक्ताः ।
बकुलपरिमला गिरा मदीया
कविकुलकर्णरसायनानि सन्तु ॥ ७ ॥

भरतविदितपादुकाप्रभावं
धरतनुजारमणीयनामधेयम् ।
करतलधृतकार्मुकं पुमांसं
मरतकनीलशरीरमाश्रयामः ॥ ८ ॥

निटिलनयननिर्ऋतिप्रदाख्यं
कुटिलनिशाचरकुम्भिनां मृगेन्द्रम् ।
कटिलसदसिमम्बुदाभमेकं
जटिलमुरीकृतचापबाणमीडे ॥ ९ ॥

निलयमखिलमङ्गलस्य रक्षो-
बलयवसप्रबलानिलायितास्त्रम् ।
कलयति हृदयं विदेहकन्या-
वलयपदाङ्कितकन्धरं पुमांसम् ॥ १० ॥

विमोहयति विष्टपत्रयजनान् गुणारोपण-
क्षणत्रुटितचण्डिकारमणचापचण्डध्वनिम् [ध्वनौ] ।
जयत्यसकृदुन्मिषत्पुलकयोरपेतत्रपं
परपस्परनिरीक्षणं रघुवरक्षमाकन्ययोः ॥ ११ ॥

करोमि हृदयाम्बुजे कमपि वीरमम्भोनिधे-
र्निबन्धनमपीन्धन ... ... बन्धुतूणीशयम् ।
न कश्चिदपि दृश्यते जगति यस्य शक्तो जये
स्मरप्रहितजानकीनयनपद्मबाणं विना ॥ १२ ॥

क एष दलदुत्पलश्रुतिरुदारवेषोज्ज्वलः
स्वयं विशति मे मनस्त्वरितमाः परिज्ञायते ।
स एष ननु जानकीकुचतटीपटीरद्रव-
प्रसक्तरसवासनाघुमुघुमायमानः प्रभुः ॥ १३ ॥

भजे शरधनुर्धरं विकटचित्रकूटाटवी-
चरं कमपि शङ्करप्रणयिनीप्रियाख्यं प्रभुम् ।
स्फुटं कलितकुङ्कुमा वदति यस्य वक्षस्तटी
मृगेन्द्ररसितत्रसज्जनकजाहठालिङ्गनम् ॥ १४ ॥

चिराय विधुरस्य मे विषयघर्मघोरातपैः
पयोदनिचयोदयप्रतिनिधिः किलेयं दशा ।

नराघमुषि राघवे यदधुना मनः प्रीयते
समस्तसुरमस्तकप्रणतिकर्मणि ब्रह्मणि ॥ १५ ॥

कटीघटितवल्कलं घनलसज्जटामण्डलं
करात्तशरकार्मुकं कमलपत्रमित्रेक्षणम् ।
तमालदलमेचकं धरणिकन्यकाकामुकं
तरङ्गितकृपारसं तरणिवंशदीपं भजे ॥ १६ ॥

अचोदितकुलक्रमं पुनरप्रष्टजातिक्रियं
नयानयविचारणाविधुरमस्तशङ्काकणम् ।
उपेयुषि विभीषणे झटिति दत्तमस्याभयं
मयेति समुदीरिता भगवतो गिरः पातु नः ॥ १७ ॥

कल्हाराम्बुजगन्धिमन्दपवने खेलन्मृगालङ्कृते
कूजत्कोकिलबालचूतगहने कूले सरय्वाः शुभे ।
पश्यान्वेति शुकं शुकीति चिबुके गृह्णन् करेण प्रियां
चित्ते भाति हि कोऽपि मे दशशिरोमत्तेभकण्ठीरवः ॥ १८ ॥

कूजत्केकिनि चित्रकूटकटके गोदावरीमेदुरे
प्रत्यग्रप्रसवस्य केसरतरोः प्रच्छायशीते तले ।
कौशेयास्तरणे विदेहदुहितुः कुर्वाणमङ्के शिरो
नीलाम्भोदनिभं भजे रघुकुलप्राचीनभाग्यं प्रभुम् ॥ १९ ॥

त्रस्तप्रस्थितहंसयूथमभितो नृत्यन्मयूरव्रजं
वल्मीकान्तरसंप्रविष्टभुजगं पङ्क्तीभवद्घातकम् ।
पुष्प्यन्नीपसिलीन्ध्रकेतकजनस्थानाटवीमेयुषा
कालिम्ना मम केनचित् कवचितं चेतो विराधद्विषः ॥ २० ॥

संरम्भस्खलितोत्तरीयमवनिन्यस्ताग्रपादाम्बुजा-
वुद्यम्य श्लथनीवि पुष्पनिचयं संगृह्णतीं जानकीम् ।
पश्यन् पञ्चवटीवने मुहुरपि प्रच्छन्न एवान्तिके
हस्तोपात्तधनुश्शरः स्फुरति मे चित्ते रघुग्रामणीः ॥ २१ ॥

निर्वृत्ते खरदूषणत्रिशिरसामुन्मा[मू]लनादाहवे
वैदेही परिषस्वजे सपदि यं मूर्ता जयश्रीरिव ।
उन्मीलत्पुलकश्रमाम्भसि धनुर्न्यस्तैकहस्ताम्बुजे
तस्मिन् सस्मितवक्त्रचन्द्रमसि मे देवे मनो धावति ॥ २२ ॥

पायात् पर्णकुटीगतो घनघटासिक्तावनीसौरभ-
घ्राणव्याप्तपुष्करद्विपकुले नीपप्रसूनाकुले ।
केकाकण्ठशिखण्डिताण्डवपदे खेलत्पुरोमारुते
नन्दन् प्रावृषि चित्रकूटकटके सीतासखो राघवः ॥ २३ ॥

अर्धावर्तितमन्त्रमर्धविरतस्वाध्यायमर्धोज्झित-
ब्रह्मोपासनमर्धमुक्तहवनातिथ्यादिसर्वक्रियम् ।
दृष्ट्वा पञ्चवटीजुषो यमृषयः सार्थं तपो मेनिरे
कन्दर्पादपि सुन्दरं व्रजति मे काकुत्स्थमेनं मनः ॥ २४ ॥

चारुस्मेरमुखाम्बुजं चरणयोर्मञ्जुक्वणन्नूपुरं
चञ्चद्रत्नललन्तिकालिकलसत्कस्तूरिकाचित्रकम् ।
कान्तव्याघ्रनखानुबन्धिकनकग्रैवेयकालङ्कृतं
कौसल्याङ्कविभूषणं कुवलयश्यामं भजामः शिशुम् ॥ २५ ॥

दत्त्वा पार्श्वजुषो विदेहदुहितुश्चापं कराम्भोरुहे
गुल्फद्वन्द्वनिवेशितस्फिगवनौ कुर्वन् समौ जानुनी ।
दृष्ट्वा कूणितया कराम्बुजयुगव्यासक्तमूलाञ्चलं
पश्यन् बाणमृजुं न वेति हृदि मे वीरोऽयमारोहति ॥ २६ ॥

उन्मीलन्नवमञ्जरीपरिमलोदञ्चद्द्विरेफारवै-
रारण्ये तुलसीवने मुखरितेऽदृश्यं शुकश्यामले ।
श्लथ्लीनमधीरहम्बलयया श्लथ्द्गृहीतं बला-
जानक्या सह चित्रकूटकटके देवं मनो ध्यायति ॥ २७ ॥

सीतादत्तकराम्बुजं पदयुगश्लिष्यन्मणीपादुकं
हर्षावेक्षिविहारबर्हपसृताभ्यर्णं घटोध्न्या गवा ।
स्वामिन् देव जयेति पञ्जरशुकस्वानोल्लसत्तोरणं
साकेताधिपतेरुपस्थवतु नः शय्यागृहान्निर्गमः ॥ २८ ॥

पाणौ मुष्टिगृहीतपन्नगलतापर्णोंबये बिभ्रतीं
वामे रत्नकरण्डकं तदपरे वीटीं विदेहात्मजाम् ।
पश्यन् कूजति पार्श्वतः कलरवे दृष्ट्वा तिरश्चीनया
मन्दस्मेरमुखीं हृदि स्फुरति मे मञ्चाधिरूढः प्रभुः ॥ २९ ॥

शैलान्मत्तोऽवतरति करिर्ज्यास्वनैर्वारय त्वं
सौमित्रे मा भवतु चकिता जानकीति प्रहिण्वन् ।

तज्ज्याघोषं मृगपतिरवं व्याहरन् वेपिताङ्गया
गाढाश्लिष्टो जनकसुतया कौसलेयोऽवतान्नः ॥ ३० ॥

हंसी मन्दं चरति हरिणी वीक्षते लोललोलं
रम्यं कूजत्ययमिह पिको राजते बर्हिणोऽसौ ।
इत्याश्चर्याद्वनभुवि वधूं दर्शयन्तीं यदि त्वां
पश्याम्येतैरलमिति वदन पातु नः कौसलेयः ॥ ३१ ॥

देव त्वां रघुवीर नीरदनिभं सीतातटित्सङ्गतं
कारुण्यामृतवर्षिणं कतिपये दृष्ट्वा मयूरा इव ।
किं नृत्यन्ति न चातका इव परे किं वा न माद्यन्त्यतः
स्वामिन् पालय पालयेत्यहमपि क्रोशामि मण्डूकवत् ॥ ३२ ॥

खेलत्केकिनि सञ्चरन् मृगशिशौ चूतस्फुरद्वल्कले
नीपन्यस्तनिषङ्गधन्वनि जनस्थानोटजप्राङ्गणे ।
सीतां पुष्पसमित्कुशं हृतवतीं संभावयन्तं दृशा
बद्धस्वस्तिकमेणचर्मणि घनच्छायं भजेयं प्रभुम् ॥ ३३ ॥

संप्राप्तो मृगयां विधाय नलिनीपत्राहृतैरम्बुभिः
संक्षाल्यांशुकपल्लवेन कुचयोः पादाब्जमुन्मार्जतीम् ।
मृष्टा नेह मनश्शिलेति विसृतां रत्नाङ्गुलीयश्रियं
वैदेहीं प्रति दर्शयन् हृदि कृतव्याजो विभुः पातु नः ॥ ३४ ॥

श्लथकचभरान्नैतद्भूमौ निपातय सुन्दरी-
त्युदितहसितं सव्रीडाया महीदुहितुर्दिशन् ।
वनतरुतले मल्लीपुष्पैः कृतं नवगर्भकं[1]
दिनकरकुलोत्तंसो देवोऽविरोहति मे मनः ॥ ३५ ॥

दलितदनुजाटोपे चापाधिरोपितसायके
मरतकमणिच्छायादायादायिमहोभरे ।
प्रणतजनताप्राणत्राणप्रवीणपराक्रमे
स्फुरति पुरतोऽस्माकं सीतापतौ दुरितं कुतः ॥ ३६ ॥

अविदितनतक्ष्मेशानीशानपास्य दिशामहो
सह परिहरत् कालीकेलीसखं मुरलीभृता ।
वनमृगपरीवारे वीरे वरेण्यधनुर्धरे
कुवलयदलश्यामे रामे कुतूहलि मे मनः ॥ ३७ ॥

---

1. गर्भकः = शिरोधृतपुष्पगुच्छा

स्फटिकधवलान्मेघश्यामे गृहीतमृगानलात्
धृतधनुरिषौ भूतेशानात् प्लवङ्गमसेविते ।
मतिरवतरत्यात्तव्याघ्राजिनाद्भुतवल्कले
शिखरितनयानाथात् पृथ्वीसुतापरिणेतरि ॥ ३८ ॥

स्वच्छन्दं व्रजसुन्दरीजनविटाद्वद्धैकदारव्रते
लीलावेणुलसत्करात् त्रिभुवनत्राणाय चापस्पृशि ।
चोराकृष्टवधूजनात् परिणतौ कीटादिमुक्तिप्रदे
व्यावृत्तं मम यादवाद्रघुपतौ चेतः स्वयं धावति ॥ ३९ ॥

कश्चिद्बाले मृत्तिकां भक्षयित्वा
कश्चिद्वृद्धश्चूतमूले लुठित्वा ।
मां रक्षेच्चेन्मास्तु तद्यन्ममास्ते
त्राता सीताकेलिलोलो युवैकः ॥ ४० ॥

अभिमतफलसिद्धये ध्यातुमेकं सुराणां
अनुसरति मनो मे यावदाबद्धमेकम् ।
अपहरति निरुन्धन्नन्तरा तावदेतत्
कपिकुलपरिवारः कश्चिदम्भोदनीलः ॥ ४१ ॥

क्षणचलितनिरूढस्वर्णदीकर्णभूषे
परिहृतमयकन्यापत्रलेखप्रसङ्गे ।
विरचितसुरसुभ्रूविभ्रमप्रातिभाव्ये
क्षुतुकितमतिभव्ये कापि कालिन्नि चेतः ॥ ४२ ॥

कचभरनिटिलभ्रूकर्णदृङ्नासिकोष्ठ-
स्तनजघननितम्बं पश्यदन्याङ्गनानाम् ।
मलिनयति मनश्चेन्मन्मथस्तावता किं
विमलयितुमहल्यापावनोऽप्यस्ति वीरः ॥ ४३ ॥

नवकुवलयदामश्यामलः कोमलाङ्ग्या
विरचितमधुरश्रीरेकया विद्युतेव ।
जलधर इव काले जृम्भमाणो मयूरं
क्षुतुकयति मनो मे कोऽपि कोदण्डभूषः ॥ ४४ ॥

मनसि मम समिन्धे पुण्यभाजामवेद्यः
कपिसदसि मुनीनां चेतसास्वादनीयः ।

जनकनृपतिकन्यासस्पृहालिङ्गनार्हैः
श्रुतियुवतिकवर्याः कोऽपि सौरभ्यसारः ॥ ४५ ॥

कुवलयदलनीलः कोऽपि रक्षोवधूनां
कुचगिरिषु निपातं वाष्पवृष्टेर्विधाता ।
निखिलभुवनचेतोवर्हिनृत्तैकहेतुः
शमयति मम तापं शार्ङ्गवानम्बुवाहः ॥ ४६ ॥

निगमशिखरिशृङ्गान्नित्यमागत्य खेल-
न्मुनिजनहृदरण्ये मोहसारङ्गमुक्ते ।
दृशवदनगजेन्द्रे दर्शिताघातलीलो
वशयति रघुसिंहो मानसं नः प्रसन्नः ॥ ४७ ॥

करयोः शरकार्मुकाभिरामं
पदयोरश्मविवेककल्परागम् ।
कलितेषुधिमंसयोः प्रभुं तं
करुणापूर्णमपाङ्गयोरुपासे ॥ ४८ ॥

अवलम्ब्य शरासमद्रिसारं
गुणमाकृष्य घनध्वनिं विमुञ्चन् ।
विशिखानहितेषु रुक्मपुङ्खान्
विहरत्याहवसीम्नि वीररामः ॥ ४९ ॥

चरमाङ्गनिबद्धचारुतूणं
सुरमाङ्गल्यधुरीणचापबाणम् ।
अलिनीलमुपैति मानसं मे
नलिनीनायकवंशभागधेयम् ॥ ५० ॥

दृशि कारुणिकः करे धनुष्मान्
कुशिकापत्यमखस्य रक्षिता यः ।
रजनीचरतूलचण्डवातो
भजनीयो मम सोऽयमेक एव ॥ ५१ ॥

नवनीरदनीलमात्तचापं
भवनीहाररविं शृणोति लोकः ।
अवनीतनयासखं जगत्या
स्तवनीयं मम दैवमेकमेव ॥ ५२ ॥

भरिता दयया दृशोः सुराणां
परितापक्षतये गृहीतचापा ।
दुरितानि धुनोतु कापि लीला-
च्छुरिता भूमिसुताकुचाङ्गरागैः ॥ ५३ ॥

सुरचारणसिद्धबद्धसेवः
शरचापाभरणो नवाम्बुदश्रीः ।
अहिमांशुकुलार्णवेन्दुरेको
महिमान्तःकरणे ममाविरस्तु ॥ ५४ ॥

धनुषा सह सायकं दधाने
जनुषा भूषितचण्डरश्मिवंशे ।
कुचनम्रमहीसुतानुरक्ते
क्वचन न्यस्तमिदं महिम्नि चेतः ॥ ५५ ॥

भयकम्पितसागरप्रशस्ते
भयकन्यातनुमण्डनासहिष्णौ ।
नवगारुडरत्नभासुरे स्या-
दवगाढं हृदयं क्वचित् प्रभौ मे ॥ ५६ ॥

निजनामरसज्ञनीलकण्ठं
भजनाय प्लवगावृतोपकण्ठम् ।
वलयन्त्रितसिन्धुमन्तरेकं
कलयन्नन्यमुपासितुं यते कम् ॥ ५७ ॥

विकटभ्रुकुटीन् विलोकतेऽरीन्
विशिखान् मुञ्चति विग्रहान् बिभर्ति ।
अनुलिम्पति शोणितैर्धरित्रीं
रणरङ्गे रघुपुङ्गवः समिन्धे (?) ॥ ५८ ॥

स्मयमानमुखेन्दुरिन्द्रनील-
द्युतिरम्भोजदलेक्षणो धनुष्मान् ।
तरलीकृतजानकीदृगन्त-
स्तरुणः कश्चन मे मनो [1]धिनोति ॥ ५९ ॥

दलदुत्पलदामकोमलाङ्गी
दशकण्ठायुरपायकालभङ्गी ।

---

1. धुनोति

मनसे मम रोचतेऽभिरूपा
करुणा काचिदुपात्तबाणचापा ॥ ६० ॥

मौलौ निधेहि मकुटं त्यज बर्हिगर्हं
बाणं गृहाण धनुषा सह मुञ्च वेणुम् ।
शाखामृगैर्विहर सन्त्यज गोपबालान्
रामो यदूद्वह भव त्वमथाश्रये त्वाम् ॥ ६१ ॥

कृष्णैकसूतरथकेतनभूतदूत
आनूरुसारथिरथात्मजमित्रभूतः ।
पाणीश....रथस्य शरासभूतः
कश्चिन्मनो हरति कार्मुकभूषणो मे ॥ ६२ ॥

दृप्यद्दशाननकलत्रकठोरगर्भ-
विभ्रंशविभ्रमपरिस्फुटसाहसेन ।
घण्टा विलुण्ठयतु नः कलुषं रवेण
कोदण्डकोटिघटिता कुलदेवतायाः ॥ ६३ ॥

देवद्विषां विजयदेहभृतां शरण्यं
कारुण्यभूषितकटाक्षमुदग्रचापम् ।
टङ्कत्रटन्मरतकोपलरत्ननील-
धाम स्मरामि धरणीतनयासहायम् ॥ ६४ ॥

आस्ते कृतान्त इति पापिषु दण्डधारी-
त्याकर्ण्यते मुहुरवाप्तपरम्पराभ्यः ।
रक्षिष्यतीति रघुनन्दनमेव साक्षा-
द्विश्वस्य केवलमहं न विचिक्रियामि ॥ ६५ ॥

तिष्ठन्तु दारुणतरा निरयाः सहस्रं
तिष्ठन्तु घोरचरिता यमकिङ्करा वा ।
पापात्मनोऽपि नियतं परिपालनाय
कोदण्डपाणिरिति कोऽपि ममास्ति नाथः ॥ ६६ ॥

लीलोपात्तबलिप्रसूनमुकुलाः स्निग्धेन सौमित्रिणा
वैदेहीकरपल्लवात्तकलशीधाराम्बुसंवर्धिताः ।
दृष्टा वत्सलया दृशा रघुपतेः पुत्रा इव प्रत्यहं
प्रायः पञ्चवटीकुटीरतरवः प्रीणन्ति मे मानसम् ॥ ६७ ॥

सौवर्णीमवसक्थिकामधिवसन् पार्श्वस्थपृथ्वीसुता
हस्ताम्भोजयुगक्रमप्रसृतया जातिस्रजा दीर्घया ।
पाणिभ्यामपि वेष्टयन् कचभरं मौल्येकपार्श्वे चितं
देवो मे हृदि भाति दत्तनयनो दृश्ये तदेकस्तने ॥ ६८ ॥

स्वप्नदृष्टं श्लोकान्तरम्—

चापसंहितशरं चरमाङ्के
बद्धतूणमुपनीविकृपाणम् ।
वञ्चनामृगवधाय वनान्ते
सञ्चरन्तमिममन्तरुपासे ॥ ६९ ॥

कौणपाधिपकदर्थितामरी-
काङ्क्षितप्रणयिबाणकार्मुकम् ।
कञ्चन श्रुतिकरण्डमौक्तिकं
कालिमानमवलोकयामहे ॥ ७० ॥

जानकीस्तनतटैकपालिका-
जातकुङ्कुमविभागपिञ्जरः ।
दृश्यते हृदि दयाधुरन्धरः
कोऽपि कोसलकुलीनकुञ्जरः ॥ ७१ ॥

मामके हृदि महीकुमारिका
कामकेलिकुतुकी नृपात्मजः ।
... ...पदमस्रबन्धुरो
नूतनोदयपयोदसुन्दरः ॥ ७२ ॥

चन्द्रशेखरशरासनच्छिदा
चातुरीचणकरारविन्दया ।
स्वीकृतं मम सुरानुकूलया
.....भ्रनीलया ॥ ७३ ॥

कौणपालिकदलीविषाणिना
बाणचापपरिकर्मपाणिना ।
चण्डिकारमणचापखण्डने
पण्डितेन मम मण्डितं मनः ॥ ७४ ॥

तुन्नकीर्णकुटिलक्षपाचरे
कृत्रिमेतरगिरामगोचरे ।

धावते हि कुलदेवतेति मे
चित्तमेवमिदमुत्तमे नृणाम् ॥ ७५ ॥

कालिकानिभरुचिः कनीयसा
कान्तया च सह कल्पितासिका ।
कार्मुकाशुगलसत्करास्बुजा
काचिदस्ति करुणा गतिर्मम ॥ ७६ ॥

मामके मनसि धान्यमालिनी-
भूषणासहभुजोष्मशालिनी ।
सा चकास्ति शरचापधारिणी
भालुमालिकुलभाग्यधोरणी ॥ ७७ ॥

याति तेजसि मनः सनातने
दूतभूषितकिरीटिकेतने ।
यामिनीचरचमूभयङ्करे
जानकीनयनकेलिकिङ्करे ॥ ७८ ॥

चङ्क्रमानुकृतगन्धसिन्धुरा
सिन्धुराजकृतसेतुबन्धना ।
वासनाधृतशरासनाशुगा
मेचका मनसि मे चकास्ति सा ॥ ७९ ॥

वानरक्षपितराक्षसव्रजं
दीनरक्षणविचक्षणं प्रभुम् ।
श्रीमदभ्यशरचापमेति मे
जामदग्न्यमदनिग्रहं मनः ॥ ८० ॥

कण्ठेकालशरासखण्डनचणं कल्याणनानागुणं
कारुण्याभरणं खरान्तकरणं कञ्जाभिरामेक्षणम् ।
पाणिद्वन्द्वगृहीतबाणधनुषं पाथोदनीलत्विषं
पौलस्त्यासुमुषं भजामि पुरुषं पार्श्वे वधूटीजुषम् ॥ ८१ ॥

कुवलयदलनीलश्रीभृतां भूकुमारी-
कुचकलशविराजत्कुङ्कुमैरङ्कितानाम् ।
दशमुखभुजतेजोदर्पतूलानिलानां
दशरथसुकृतानां दासभावं भजामः ॥ ८२ ॥

करधृतशरचापः कान्तिमत्पङ्कजाक्षो
निहितशरधिरंसे नीरदस्निग्धनीलः ।
वनमृगपरिवारो वन्दनीयो मुनीनां
मदयति हृदयं मे मैथिलीप्राणनाथः ॥ ८३ ॥

मघवदुपलनीले मण्डलीकृत्य चापं
मुहुरभिदशकण्ठं मुञ्चतीपुप्रपञ्चम् ।
रणधरणिरजोभिर्धूसरे वासरेश-
प्रभवकुलभवानामुत्तमे चित्तमेति ॥ ८४ ॥

शुभगुणकलकण्ठस्तोममाकन्दशाखा-
नियमिनिवहचेतोनीलकण्ठाभ्ररेखा ।
दशवदनवधूटीचक्रवाकीत्रियामा
जनयति कुतुकं मे जानकीप्रेमसीमा ॥ ८५ ॥

तारुण्यदर्पतरलीकृतगोपकन्या
दृष्टिप्रियं तव यदस्ति वपुस्तदास्ताम् ।
काकुत्स्थवीर कमलानयनाभिरामं
गात्रं त्विदं तव करोति मुदं मदन्तः ॥ ८६ ॥

कल्याणमावहतु दाशरथेः कटाक्षः
शाखामृगे शतमखादपि सानुकम्पः ।
आभाति भूमितनयाधरबिम्बलोभ-
सम्पातसंक्रमितलाक्ष इवारुणो यः ॥ ८७ ॥

(रामं सुन्दरतया महालक्ष्मीश्चकमे इति पुराणे कथानुसन्धेया।)

स कश्चन गिरीन्द्रजासखशरासनत्रश्चको
मनो हरति मामकं मरतकोपलश्यामलः ।
धनुश्शरलसत्करो धरणिकन्यकाप्रेमभू-
र्धनञ्जयरथध्वजाभरणभूतदूतः प्रभुः ॥ ८८ ॥

धन्या वयं धरणिकन्याकया सनाथे
नाथे स्थिते जगति नः परिपालनाय ।
यश्शीलितो यतिभिरात्मनि निष्कलङ्के
लङ्केश्वरं लवितुमाप मनुष्यरूपम् ॥ ८९ ॥

दीनानुकम्पि दिवसेश्वरवंशरत्नं
कर्तव्यपेतवचसां कथमप्युपेयम् ।

तापिञ्छनीलरुचि तामरसायताक्षं
चापोज्ज्वलं किमपि वस्तु ममाविरस्तु ॥ ९० ॥

आबद्धतूणमंसे करकमलद्वन्द्वधृतधनुर्बाणम् ।
पश्यामि हृदयकमले रामं दूर्वादलश्याम(ल)म् ॥ ९१ ॥

मज्जति मनो मदीयं क्वचिदपि दलितेन्द्रमणिनीले ।
महिमनि महीकुमारीकुचकुड्मलकुङ्कुमाङ्कितोरस्के ॥ ९२ ॥

जगदघहरप्रशंसे जनकसुतावलयपदविलसदंसे ।
निगमान्तनलिनहंसे रमते मम हृदयं रविकुलवतंसे ॥ ९३ ॥

सरसघनसारमेदुरचन्दननिष्यन्दशीतलालोकम् ।
कमपि दलितमयकन्यामङ्गलमालिङ्गति मनो मे ॥ ९४ ॥

विकचेन्दीवरनीलं विदेहतनयाकुचस्तबकलोलम् ।
निगमान्तसुधानिलयं माधुर्यं पिबति मामकं हृदयम् ॥ ९५ ॥

गिरिशधनुस्तरुकरिणं गलितभृगुप्रवरगर्वसर्वस्वम् ।
कलयामि कमपि वीरं कृत्तकबन्धं कृताम्बुनिधिबन्धम् ॥ ९६ ॥

कुशिकसुतकुतुकदायी कुवलयदलनीलकोमलशरीरः ।
कोसलकुलतिलको मे कोऽपि गतिः कोविदाररथकेतुः ॥ ९७ ॥

कुवलयदामसरूपं कुण्ठितदशकण्ठनिरुपमाटोपम् ।
करतलगृहीतचापं कलये तद्धाम पामरदुरापम् ॥ ९८ ॥

दलितेन्दीवररूपे दर्शितदशकण्ठयौवतविलापे ।
धृतशरचापकलापे दीव्यति हृदयं दिलीपकुलदीपे ॥ ९९ ॥

निगमान्तवनकुरङ्गे निर्मलमुन्यन्तरङ्गनटरङ्गे ।
रुचितुलितरवितुरङ्गे कचन रमे रघुकुलार्णवतरङ्गे ॥ १०० ॥

॥ इति श्रीरामकर्णामृतं सम्पूर्णम् ॥

---

१९. ॥ अथ श्रीरामप्रपत्तिशतकम् ॥

कल्याणाद्रिमहाधीरः कल्याणगुणवारिधिः ।
कल्याणरामः कृपया कल्याणानि करोतु नः ॥

राजराजशिरोरत्नराजनीराजिताङ्घ्रये ।
राजद्राजीवनेत्राय रामराजाय मङ्गलम् ॥

यः कोसलेन्द्रदुहितुः सुकृतेन साक्षा-
ज्जातो हरिस्तनुभवो दिवि वासवाद्यैः ।
अस्मान् जगच्च विनुतः परिपालयेति
तं राममार्तिहरणं शरणं भजामि ॥ १ ॥

वृन्दारका यदुदये प्रमदादयोध्यां
सन्तानकल्पकुसुमैः परितो ववर्षुः ।
गन्धर्वजातिरतिगानरता बभूव
तं राममार्तिहरणं शरणं भजामि ॥ २ ॥

यस्योदये मनुजलोकशुभोदयोऽभूत्
सर्वं क्षणेन जगतो दुरितं प्रशान्तम् ।
चक्रुर्मुदा नटनमप्सरसः प्रकामं
तं राममार्तिहरणं शरणं भजामि ॥ ३ ॥

यस्याद्वितीयमनघं शुभदं भयघ्नं
मुक्तिप्रदं श्रवणमङ्गलमार्तिहारि ।
रम्यं समुल्लसति नाम जगत्पवित्रं
तं राममार्तिहरणं शरणं भजामि ॥ ४ ॥

यं लक्ष्मणेन भरतेन च सानुजेन
बाल्ये सहाभिविहरन्तमवेक्ष्य हृष्टया ।
प्रापुर्न तृप्तिमवशाः प्रमदेन लोका-
स्तं राममार्तिहरणं शरणं भजामि ॥ ५ ॥

यः शैशवे कनकमौक्तिकनीलरत्न-
माणिक्यवज्रवरभूषणभूषिताङ्गः ।
लोकान् प्ररञ्जयति कुञ्जरमञ्जुगत्या
तं राममार्तिहरणं शरणं भजामि ॥ ६ ॥

यः शैशवे मधुरसूक्तिसुधाप्रवाहै-
र्लोकस्य कर्णहृदयानि मुहुर्निषिच्य ।
चक्रे निराकृतसुरपधिपभाग्यमेनं
तं राममार्तिहरणं शरणं भजामि ॥ ७ ॥

यं शैशवातिरमणीयसुभद्रवेष-
माकर्णदीर्घनवरक्तसरोजनेत्रम् ।

धन्या बभूवुरवलोक्य दृशैव पौरा-
स्तं राममार्तिहरणं शरणं भजामि ॥ ८ ॥

यं शैशवे नयनसौख्यदचारुलीला-
कन्दर्पकोटिकमनीयनरावतारम् ।
धन्या बभूवुरवलोक्य दृशैव पौरा-
स्तं राममार्तिहरणं शरणं भजामि ॥ ९ ॥

यं मौक्तिकाभरणसुन्दरमन्दहासं
नव्यप्रवालरुचिराधरशोभमानम् ।
धन्या बभूवुरवलोक्य दृशैव पौरा-
स्तं राममार्तिहरणं शरणं भजामि ॥ १० ॥

यः शैशवे कुशिकजेन मखावनाय
नीतोऽनुजेन सह संप्रतिपन्नमन्त्रः ।
मध्याह्नभास्कर इवातितरां रराज
तं राममार्तिहरणं शरणं भजामि ॥ ११ ॥

बाल्ये समस्तजनतावधकारिवृत्तिं
यस्ताटकां स्त्रियमपीभसहस्रवीर्याम् ।
हत्वा सलीलमकरोद्भुवनं प्रहृष्टं
तं राममार्तिहरणं शरणं भजामि ॥ १२ ॥

यस्ताटकानिधनहृष्टमुनिप्रदिष्टा-
न्यस्त्राण्यगण्यमहिमानि चिरन्तनानि ।
साक्षाद्विधाय च मनोवशगानि चक्रे
तं राममार्तिहरणं शरणं भजामि ॥ १३ ॥

पौगण्ड एव वयसि प्रबलं सुबाहुं
यः केसरीव करिणं समितौ निहत्य ।
मारीचमध्वमनयत् सहसा शरेण
तं राममार्तिहरणं शरणं भजामि ॥ १४ ॥

यो मैथिलेन्द्रनगरीमभियातुकाम-
स्त्रिस्रोतसं द्युपथिकां कुशिकात्मजोक्ताम् ।
शृण्वन् मुमोद भृशमात्मकुलीनभूपान्
तं राममार्तिहरणं शरणं भजामि ॥ १५ ॥

यो गौतमाख्यमुनियोषितमात्मकान्त-
शापोररीकृतशिलावपुषं क्षणेन ।
चक्रे स्वपादरजसा तटिदाभदेहां
तं राममार्तिहरणं शरणं भजामि ॥ १६ ॥

यो गौतमात्मजसमीरितगाधिसूनु-
ब्राह्मण्यसङ्गमकथाश्रुतिहृष्टचेताः ।
श्राव्यस्तमेव सुचिरं हृदये ननन्द
तं राममार्तिहरणं शरणं भजामि ॥ १७ ॥

देवासुरैरपि दुरासदमीशचापं
भङ्क्त्वा मृणालमिभराडिव लीलया यः ।
सत्यञ्चकार जनकं सफलप्रतिज्ञं
तं राममार्तिहरणं शरणं भजामि ॥ १८ ॥

यो जानकीपरिणये स्वशिरो विनम्य
दोर्भ्यां तदङ्घ्रिसरसीरुहमस्तमौलौ ।
आरोप्य तन्मुखमवेक्ष्य जहास मन्दं
तं राममार्तिहरणं शरणं भजामि ॥ १९ ॥

यो मैथिलेन्द्रनगरात् स्वपुरं प्रयास्यन्
मार्गे गृहीतपरशुं भृगुजं सचापम् ।
व्यद्रावयद्धृतशरासनदर्पवीर्यं
तं राममार्तिहरणं शरणं भजामि ॥ २० ॥

यो भ्रातृभिस्त्रिभिरुदूढवधूसमेतै-
र्हेमप्रसाधितबलद्विरदाधिरूढः ।
साकेतमेत्य धरणीसुतयैव रेमे
तं राममार्तिहरणं शरणं भजामि ॥ २१ ॥

यो मातुलालयमतिप्रमदेन साकं
संप्रेषयन् ससहजं भरतं स्वपित्रोः ।
शुश्रूषया चिरमशेषजनप्रियोऽभूत्
तं राममार्तिहरणं शरणं भजामि ॥ २२ ॥

यस्तातमातृवचनावितथीकरस्तं
साम्राज्यभोगमनपेक्ष्य सहानुजेन ।

वध्वा ययौ वनमशेषजगद्धिताय
तं राममार्तिहरणं शरणं भजामि ॥ २३ ॥

यो नव्यशाद्वलतले मृदुपादगत्या
गङ्गामुपेत्य गुहमानित उत्तरंस्ताम् ।
हित्वा गुहं सरथसूतमभूज्जटाल-
स्तं राममार्तिहरणं शरणं भजामि ॥ २४ ॥

यस्तज्जनेन सह सोदरजानकीभ्यां
तीर्त्वा प्लवैः ससलिलाः सरितश्च बह्वीः ।
रेमे पुरीव सुदृशा सह चित्रकूटे
तं राममार्तिहरणं शरणं भजामि ॥ २५ ॥

यो मातुलस्य निलयाद्वनमागतेन
पादानतेन भरतेन पुरागमाय ।
संप्रार्थितोऽपि गमनं मनसापि नैच्छत्
तं राममार्तिहरणं शरणं भजामि ॥ २६ ॥

यो राज्यपालनकृते मणिपादुके स्वे
दत्त्वा नताय भरताय च सान्त्वपूर्वम् ।
पुर्यैं निवर्त्य तमभूत् परमप्रहृष्ट-
स्तं राममार्तिहरणं शरणं भजामि ॥ २७ ॥

यः सानुजो वनितया सह चित्रकूटं
त्यक्त्वात्रिमस्य च वधूं प्रणिपत्य ताभ्याम् ।
दत्तं विभूषणकुलं मुमुदे प्रगृह्य
तं राममार्तिहरणं शरणं भजामि ॥ २८ ॥

यो दण्डकावनमुपेत्य खलं विराधं
हत्वा विदेहतनयाममितप्रमोदाम् ।
कृत्वा तुतोष शरभङ्गकृताभिताशीः
तं राममार्तिहरणं शरणं भजामि ॥ २९ ॥

यो वै सुतीक्ष्णमुनिना समनुगृहीतः
कुम्भोद्भवं समभिवाद्य मुदा च तस्मात् ।
तूणीं शरासनमसिं प्रतिलभ्य रेजे
तं राममार्तिहरणं शरणं भजामि ॥ ३० ॥

यो दण्डकावनतपोनिरतैर्मुनीन्द्रै-
रभ्यर्थितो निखिलराक्षसनाशनाय ।
तेभ्यस्तथेति दयया विदधे प्रतिज्ञां
तं राममार्तिहरणं शरणं भजामि ॥ ३१ ॥

यो यातुधाननिधने विधृतप्रतिज्ञः
कालं व्यपेक्ष्य निवसन् वरपञ्चवट्याम् ।
मित्रं जटायुषमवाप्य तुतोष कामं
तं राममार्तिहरणं शरणं भजामि ॥ ३२ ॥

यो दुर्मतिं झटिति शूर्पणखां विभीकां
स्वस्मिन् सगर्भकरचूर्णितकर्णनासाम् ।
कृत्वा मुमोच दयया विपिने सजीवां
तं राममार्तिहरणं शरणं भजामि ॥ ३३ ॥

यो दूषणत्रिशिरसौ च खरं तदीयं
सैन्यं चतुर्दशगुणोक्तसहस्रसङ्ख्यम् ।
एको निहत्य मुमुदे सहसा जयेन
तं राममार्तिहरणं शरणं भजामि ॥ ३४ ॥

यः पङ्क्तिकन्धरहृतां मृगयन् स्वकान्तां
तस्याः कृते खगपतिं पथि मुक्तजीवम् ।
दग्ध्वा स्वतातवदमुष्य ददौ च मुक्तिं
तं राममार्तिहरणं शरणं भजामि ॥ ३५ ॥

यो भक्षितुं स्वमनुजं च कृतप्रयत्नं
दग्ध्वा कबन्धमपि योजनदीर्घबाहुम् ।
श्रुत्वा तदुक्तशबरीचरितो ननन्द
तं राममार्तिहरणं शरणं भजामि ॥ ३६ ॥

यस्तापसीं ससहजः शबरीमुपेत्य
तत्कल्पितप्रचुरपूजनलब्धहर्षः ।
तद्भुक्तशेषफलभुक् प्रमुमोद कामं
तं राममार्तिहरणं शरणं भजामि ॥ ३७ ॥

यो व्याधयोधिदभिसूचितमैत्रपात्रं
सुग्रीवमेव मृगयन् समुपेत्य पम्पाम् ।

तत्राञ्जनेयमभिगृह्य ननन्द गाढं
तं राममार्तिहरणं शरणं भजामि ॥ ३८ ॥

यो वायुसूनुघटितातुलमैत्रहृष्ट-
सुग्रीवदत्तनिजदारविभूषणानि ।
दृष्ट्वा तुतोष रमणीमिव वीक्ष्य साक्षा-
त्तं राममार्तिहरणं शरणं भजामि ॥ ३९ ॥

यो मित्रपुत्रकथिताग्रजवैरदुःख-
निर्मोचनोदितमनाः करुणारसाब्धिः ।
हन्यां तमाश्विति ददावभयं च तस्मै
तं राममार्तिहरणं शरणं भजामि ॥ ४० ॥

यो मित्रमोदविधये सहसैककेन
बाणोत्तमेन विनिहत्य महेन्द्रपुत्रम् ।
सुग्रीवमेव कपिराज्यपदेऽभ्यषिञ्च-
त्तं राममार्तिहरणं शरणं भजामि ॥ ४१ ॥

यो भूमिशैलनिलयान् जनकेन्द्रपुत्र्याः
संमार्गणाय सहसा कपिनायकेन ।
आनाथितान् कपिवरान् मुमुदे समीक्ष्य
तं राममार्तिहरणं शरणं भजामि ॥ ४२ ॥

यः सौरिणा कपिवरेषु दिशश्चतस्रः
प्रस्ताविते कृतिनं हनुमन्तमेव ।
ज्ञात्वा करेऽस्य विततार निजाङ्गुलीयं
तं राममार्तिहरणं शरणं भजामि ॥ ४३ ॥

यत्प्राभवादितरकीशवरैरलङ्घ्य-
वारांनिधिं पथि विधूनितमार्गविघ्नम् ।
वेशन्तवल्लघु ततार समीरसूनु-
स्तं राममार्तिहरणं शरणं भजामि ॥ ४४ ॥

लङ्कामुपेत्य निशि राक्षसकोटिगुप्तां
केनाप्यदृश्यगतिरेव यदीयभूम्ना ।
रक्षोऽवरोधमनिलात्मभवश्चचार
तं राममार्तिहरणं शरणं भजामि ॥ ४५ ॥

यत्पादपद्मयुगलस्मरणो हनूमान्
सीतां विलोक्य च वितीर्य वराङ्गुलीयम् ।
चूडामणिं समुपगृह्य मुदं प्रपेदे
तं राममार्तिहरणं शरणं भजामि ॥ ४६ ॥

यत्पादचिन्तनबलादशवक्त्रकान्ता-
लीलावनं लघु विभज्य समीरसूनुः ।
तत्पालकानपि निहत्य जयी मुमोद
तं राममार्तिहरणं शरणं भजामि ॥ ४७ ॥

यत्पादसंश्रयबलात् पवमानसूनुः
सेनापतीन् झटिति पञ्च च मन्त्रिपुत्रान् ।
सप्ताक्षमप्यतिबलं सुलभं जघान
तं राममार्तिहरणं शरणं भजामि ॥ ४८ ॥

यत्पादसेवनबलेन हि मरुत्कुमारो
ब्रह्मास्त्रबन्धनमपीन्द्रजिता प्रयुक्तम् ।
निर्धूय पङ्क्तिवदनं च तृणाय मेने
तं राममार्तिहरणं शरणं भजामि ॥ ४९ ॥

यत्पादवारिजयुगस्मृतिवैभवेन
बालाग्रसीम्नि दशकन्धरदीपितेन ।
वैश्वानरेण पवनात्मभवो न देहे[भुवो न दाहः]
तं राममार्तिहरणं शरणं भजामि ॥ ५० ॥

यत्पादपद्मविनतिप्रभवप्रभावात्
पश्यत्सु राक्षसगणेष्वपि वायुसूनुः ।
भस्मीचकार रुचिरामविशङ्कय लङ्कां
तं राममार्तिहरणं शरणं भजामि ॥ ५१ ॥

यत्पादसंस्तुतिबलेन सुतोऽनिलस्य
भस्मावशेषविभवां प्रविधाय लङ्कां ।
तीर्त्वाब्धिमुत्तरतटं पुनराजगाम
तं राममार्तिहरणं शरणं भजामि ॥ ५२ ॥

यत्पादभक्तिमहिमातिशयेन वायोः
पुत्रोऽङ्गदादिकपिभिः सह दुष्प्रवेशम् ।

भूत्वा विभोर्मधुवनं च पपौ मधूनि
तं राममार्तिहरणं शरणं भजामि ॥ ५३ ॥

यत्सन्निधिं समुपगम्य मरुत्तनूजः
पादाम्बुजं सविनयं सहसा प्रणम्य ।
दृष्टा मया जनकजेति जगाद मोदा-
त्तं राममार्तिहरणं शरणं भजामि ॥ ५४ ॥

यो मारुतेर्निजवधूकुशलप्रवृत्तिं
चूडामणिं च समवाप्य परं प्रहृष्टः ।
सर्वस्वदानसदृशं परिषस्वजे तं
तं राममार्तिहरणं शरणं भजामि ॥ ५५ ॥

यः स्वानुजार्कजसमीरजशक्रभूज-
नीलादिभिः कपिवरैः सह मन्त्र्यमाणः ।
लङ्कां शुभंयुदिवसे चकमेऽभिगन्तुं
तं राममार्तिहरणं शरणं भजामि ॥ ५६ ॥

यः पावमानिमधिरुह्य मुदा स्वयं तं
तारासुतं समधिरूढवतानुजेन ।
सम्भाषमाण इनजेन ययावबाचीं
तं राममार्तिहरणं शरणं भजामि ॥ ५७ ॥

यः सर्वराक्षसविभेदनबद्धदीक्षै-
र्वृक्षायुधैर्हरिबलप्रवरैः परीतः ।
तीरं ययौ सपदि दक्षिणवारिराशे-
स्तं राममार्तिहरणं शरणं भजामि ॥ ५८ ॥

पङ्क्त्याननानुजजुषेऽपि विभिषणाय
स्वाङ्घ्रिद्वयीसरसिजं शरणं गताय ।
योऽदाच्चिरायुरपि राक्षसराजलक्ष्मीं
तं राममार्तिहरणं शरणं भजामि ॥ ५९ ॥

गम्भीरमात्मनि पराङ्मुखमम्बुधिं यः
क्रुद्धो विशोष्य विशिखेन शिखिप्रभेण ।
तत्प्रार्थितः पुनरमुं स्ववशं निनाय
तं राममार्तिहरणं शरणं भजामि ॥ ६० ॥

अब्धिं नलेन हरिभिर्लघु बन्धयित्वा
तीर्त्वा तमाशु निखिलैः सह वानरैर्यः ।
लङ्कां निरुच्छ्वसनमारुरुधे समन्तात्
तं राममार्तिहरणं शरणं भजामि ॥ ६१ ॥

यो वज्रदंष्ट्रभतिदुष्टमकम्पनं च
धूम्राक्षमक्षयमुखानपि राक्षसेन्द्रान् ।
रक्षोबलाधिपतिमप्यहनत् प्रहस्तं
तं राममार्तिहरणं शरणं भजामि ॥ ६२ ॥

यो लीलया युधि निकृत्तरथध्वजाक्ष-
सेनाकिरीटशरचापमतिक्षताङ्गम् ।
रक्षोऽधिराजमकरोदपि कान्दिशीकं
तं राममार्तिहरणं शरणं भजामि ॥ ६३ ॥

यः कुम्भकर्णमचलं मघवानिवाशु
बाणैश्च मूर्ध्नि पदयोरपि चूर्णयित्वा ।
शोकाम्बुधावलममज्जयदाशरेन्द्रं
तं राममार्तिहरणं शरणं भजामि ॥ ६४ ॥

यो देवतान्तकनरान्तकरातिकाय-
कुम्भत्रिशीर्षकनिकुम्भमहोदरादीन् ।
संहार्य वानरगणैर्मुमुदे जयेन
तं राममार्तिहरणं शरणं भजामि ॥ ६५ ॥

यः शोणिताक्षमकरेक्षणमत्तयुद्धो-
न्मत्तान् विरूपनयनादिनिशाचरेन्द्रान् ।
संहारयन् कपिवरैर्मुदमाप गाढं
तं राममार्तिहरणं शरणं भजामि ॥ ६६ ॥

नाम स्मरन् मनसि यस्य समीरपुत्रो
गत्वान्तरं जलधिमेकमुहूर्तमात्रात् ।
दिव्यौषधाद्रिमुपगृह्य पुनः समागात्
तं राममार्तिहरणं शरणं भजामि ॥ ६७ ॥

यः पाकशासनजितं समुपात्तमायं
यज्ञक्रियार्थमुपविष्टनिकुम्भिलान्तम् ।

संहार्यं संमुदमविन्दत लक्ष्मणेन
तं राममार्तिहरणं शरणं भजामि ॥ ६८ ॥

यः स्यन्दनेभतुरगालिपदातिपूर्णाः
सन्नद्धमूलबलसङ्घपरार्धकोटीः ।
यामार्धतः प्रतिजघान सुलीलयैक-
स्तं राममार्तिहरणं शरणं भजामि ॥ ६९ ॥

यः कौणपेश्वरशिरांसि दशोज्ज्वलानि
कृत्तानि चैकशतमङ्कुरितानि भूयः ।
दृष्ट्वा ननन्द शतकण्ठतपःप्रभावं
तं राममार्तिहरणं शरणं भजापि ॥ ७० ॥

यो वासवप्रहितमातलिसंप्रणीतं
दिव्यं रथं समभिनन्द्य मुदाधिरुह्य ।
तेजोवृतो विरुरुचेऽसुरहेव[मघवेव] साक्षात्
तं राममार्तिहरणं शरणं भजामि ॥ ७१ ॥

यः संयुगे दशमुखं निशितैः स्वबाणै-
रापादमस्तकमतीव गवाक्षिताङ्गम् ।
कृत्वापि निश्चलमवेक्ष्य बभार हर्षं
तं राममार्तिहरणं शरणं भजामि ॥ ७२ ॥

संग्रामभुव्यरिजयाय घटोद्भवेन
प्रीत्योपदिष्टमुपगृह्य रविस्तवं यः ।
तेजो वहन् युधि बभौ रिपुदुर्निरीक्षं
तं राममार्तिहरणं शरणं भजामि ॥ ७३ ॥

रक्षोऽधिपान्तकरणेऽतिविचक्षणोऽपि
यो मात.....वतितरां समनुग्रहीतुम् ।
आज्ञापितास्त्रमरिनाशकमेव मेने
तं राममार्तिहरणं शरणं भजामि ॥ ७४ ॥

योऽरुणेण पद्माजनुषः क्षणदाचरेन्द्रं
द्वेधैव वक्षसि विभिद्य निपात्य भूमौ ।
लोकाखिलार्तिमपनीय भृशं ननन्द
तं राममार्तिहरणं शरणं भजामि ॥ ७५ ॥

यत्संहृतो दशमुखोऽप्यतिपापकर्मा
सद्यो विधूतकलुषोऽधिक[दीपितात्मा] ।
सायुज्यमुक्तिमगमद्धरयोगिगम्यां
तं राममार्तिहरणं शरणं भजामि ॥ ७६ ॥

यः सापराधिनमपि क्षणदाचरेन्द्रं
संहृत्य संप्रकटयन् स्वकृपालुतां यः[यम्] ।
तेजोमयं स्वपदमेव समानिनाय
तं राममार्तिहरणं शरणं भजामि ॥ ७७ ॥

निर्वर्त्य चाश्रुतमथाशु विभीषणं यो
लङ्काधिपत्यपद एव मुदाभिषिच्य ।
सङ्ग्राममूर्ध्नि विजयी विरराज धन्वी
तं राममार्तिहरणं शरणं भजामि ॥ ७८ ॥

योऽभ्यर्थितोऽपरिचयेऽपि विभीषणेन
तं मानयन् सकरुणं निजसान्त्ववाक्यैः ।
पूजां जहर्ष सुहृदां हृदि कारयित्वा
तं राममार्तिहरणं शरणं भजामि ॥ ७९ ॥

सौशील्यनिर्जितवसिष्ठवधूस्वभावां
प्राणप्रियां निजवधूमपि धर्मबद्धः ।
निन्दन् वपुस्त्रिजगतीमनलो न मेने (?)
तं राममार्तिहरणं शरणं भजामि ॥ ८० ॥

यस्मै भिया हुतवहो निजसात्कृताङ्गी-
मत्याहृतांशुकविभूषितदिव्यदेहाम् ।
अङ्के वहन् पुनरदादवनीतनूजां
तं राममार्तिहरणं शरणं भजामि ॥ ८१ ॥

संवीक्ष्य यं विजयिनं शिवपद्मजेन्द्र-
वैवस्वताम्बुपतिवैश्रवणादिदेवाः ।
कल्पप्रसूननिकरैः समुदोऽभ्यवर्षं
स्तं राममार्तिहरणं शरणं भजामि ॥ ८२ ॥

राम प्रसीद रघुवीर रणाग्रधीम्
रक्षःकुलान्तक विभो विजयी भवेति ।

यः संस्तुतोऽखिलसुरैर्विरराज वीरः
तं राममार्तिहरणं शरणं भजामि ॥ ८३ ॥

यस्त्र्यम्बकेण धुरि दर्शितमात्मतातं
दृष्ट्वा समुज्ज्वलविमानगतं प्रणम्य ।
अङ्के धृतः सपदि तेन ननन्द कामं
तं राममार्तिहरणं शरणं भजामि ॥ ८४ ॥

यः पूर्वमात्मगुरुणा भरते वितीर्णं
शापं तमेनमभिवाद्य च तत्प्रसादात् ।
संमोचयन् तमतनोत्तदनुगृहीतं
तं राममार्तिहरणं शरणं भजामि ॥ ८५ ॥

उज्जीवयन् पुनरपि प्रहतान् समीके
कीशान् सुरोत्तमवरच्छलतःसुरेषु ।
यो वैभवप्रकटनाय मुदान्वितोऽभूत्
तं राममार्तिहरणं शरणं भजामि ॥ ८६ ॥

यः पुष्पकं समधिरुह्य वधूसहायः
साकं निजानुजविभीषणभानुसूभिः ।
अन्यैर्हरीन्द्रनिकरैः स्वपुरीं प्रतस्थे
तं राममार्तिहरणं शरणं भजामि ॥ ८७ ॥

गच्छन् पुरीं दिवि विमानग एव वध्वै
युद्धे दशाननमुखारिवधस्थलानि ।
सन्दर्शयन् सह तया मुमुदे भृशं य-
स्तं राममार्तिहरणं शरणं भजामि ॥ ८८ ॥

यो वायुजागममहस्करपुत्रमैत्रीं
भिल्लप्रियार्चनविधिं च महीसुतायै ।
जल्पन्निमां व्यधित विस्मितचित्तवृत्तिं
तं राममार्तिहरणं शरणं भजामि ॥ ८९ ॥

यश्चोदितो वनितया कपिवर्यपुर्यां
तारामुखाः कपिवधूः परिभूषिताङ्गीः ।
आनाय्य यानमधिरोप्य बभार हर्षं
तं राममार्तिहरणं शरणं भजामि ॥ ९० ॥

यो वानरीभ्य उरुमैत्रभरान्वितेभ्यः
आत्माटवीगमनहेतुमुदीरयन्तीम् ।
कान्तां विलोक्य मधुरं प्रहसन् जगाम
तं राममार्तिहरणं शरणं भजामि ॥ ९१ ॥

यः सर्वमित्रनिकरैरनुजेन वध्वा
साकं पुरन्दरपुरोहितनन्दनस्य ।
प्राप्याश्रमं तमभिवाद्य कृतार्थ आसी-
त्तं राममार्तिहरणं शरणं भजामि ॥ ९२ ॥

यस्तापसेन भृशमर्चितमात्मपुर्यां
शृण्वन् स्वबन्धुकुशलानि तदीयवाचा ।
ज्ञात्वा ननन्द भरतस्य तपश्चिवृत्तिं
तं राममार्तिहरणं शरणं भजामि ॥ ९३ ॥

यो वायुजोदितनिजागमनश्रुतिश्री-
संपूर्णचित्तभरतं प्रणताङ्घ्रिपद्मम् ।
प्रीत्या निजाङ्कमधिरोप्य तमालिलिङ्ग
तं राममार्तिहरणं शरणं भजामि ॥ ९४ ॥

भक्त्या य आर्तजननीमभिवाद्य चान्याः
प्रीत्या तदीरितमहाशिष आदधानः ।
रेजे शतक्रतुरिव प्रसुवा समेतः
तं राममार्तिहरणं शरणं भजामि ॥ ९५ ॥

यः सोदरैर्वनितया हरिभिश्च नन्दि-
ग्रामात् समं नवसहस्रगजाधिरूढैः ।
प्राप्याभवत् प्रमदवान्नगरीमयोध्यां
तं राममार्तिहरणं शरणं भजामि ॥ ९६ ॥

राज्यावनक्षमतमे भरतप्रणीते
संयोज्य यः स्वपदयोर्मणिपादरक्षे ।
पूर्णं मनोरथमहो भरतस्य चक्रे
तं राममार्तिहरणं शरणं भजामि ॥ ९७ ॥

योऽनुग्रहं हरिवराय वितीर्य पूर्वं
पश्चात् स्वयं नतविभीषणदत्तहस्तः ।

यस्तातवेश्म समलङ्कृतमाससाद
तं राममार्तिहरणं शरणं भजामि ॥ ९८ ॥

युक्ते वसिष्ठगदिते विजये मुहूर्ते
सिंहासने रविशतद्युतिरत्नदीप्ते ।
अध्यास्य मेरुशिखरेऽर्क इवाभिरेजे
तं राममार्तिहरणं शरणं भजामि ९९ ॥

यं वायुजप्रमुखवानरवर्यनीत-
गङ्गादिसिन्धुचतुर्णवपुण्यतोयैः ।
ब्रह्मात्मजो मुनिवरो विधिनाभ्यषिञ्चत्
तं राममार्तिहरणं शरणं भजामि ॥ १०० ॥

मान्यं मनुप्रभृतिभिर्मकुटं महार्घं
मौलौ वसिष्ठमुनिना निहितं वहन् यः ।
मध्येसभं विरुरुचे मघुहेव साक्षा-
त्तं राममार्तिहरणं शरणं भजामि ॥ १०१ ॥

यस्मिन् स्वयं त्रिभुवनावनदक्षिणेन [भारदक्षे]
सर्वंसहापतिपदे सहसाभिषेकैः[षिक्ते] ।
भेजे मही वसुमतीपदवाच्यभावं
तं राममार्तिहरणं शरणं भजामि ॥ १०२ ॥

कान्तस्य यस्य जगतां कलिताभिषेके
हृष्टा बभूव धरणीयमकृष्टपच्या ।
गावः सुपुष्टवपुषो ह्यभवन् घटोध्न्यः
तं राममार्तिहरणं शरणं भजामि ॥ १०३ ॥

यस्मिन् प्रभौ भुवि महीसुरपूर्ववर्णा
आसन्नधर्मविरता निजधर्मनिष्ठाः ।
अन्योन्यवैरविमुखाः करुणार्द्रचित्ता-
स्तं राममार्तिहरणं शरणं भजामि ॥ १०४ ॥ ॥

यस्मिन् धरां समनुशासति सर्वमर्त्या
असन् सहस्रशरदायुरनेकपुत्राः ।
आढ्याः प्रमोदभरिताश्च निरामयाश्च
तं राममार्तिहरणं शरणं भजामि ॥ १०५ ॥

यस्य प्रभुत्वपदमावहतो धरण्यां
सामन्तभूमिपतयः स्वयमङ्घ्रिपद्मे ।
निक्षिप्तमौलिमकुटाः करदा बभूवु-
स्तं राममार्तिहरणं शरणं भजामि ॥ १०६ ॥

यस्मिन् क्षितीशपदभाजि भुवि प्रभीता
रक्षःपिशाचकुलदुर्ग्रहभूतवर्गाः ।
क्षुद्रान् जनानपि कदापि न पीडयन्ति
तं राममार्तिहरणं शरणं भजामि ॥ १०७ ॥

जातु स्मृते दुरितहारिणि यस्य नाम्नि
नश्यन्त्यघानि सकलानि पुराकृतानि ।
वाञ्छाधिकानि कुशलानि भवन्ति सद्य-
स्तं राममार्तिहरणं शरणं भजामि ॥ १०८ ॥

अष्टोत्तरैकशतपद्यसुपूरितेन
भक्त्या[मुहुःस्तुतिव]रेण मयेड्यमानः ।
रामः स एष जनकात्मजया समेतः
प्रीतः सदापि हृदये मम सन्निधत्ताम् ॥ १०९ ॥

॥ इति श्रीरामप्रपत्तिशकं सम्पूर्णम् ॥

---

२१. ॥ अथ श्रीराघवस्तोत्रम् ॥

इन्द्रनीलाचलश्यामामिन्दीवरदृगुज्ज्वलम् ।
इन्द्रादिदैवतैः सेव्यमीडे राघवनन्दनम् ॥ १ ॥

पालिताखिलदेवौघं पद्मगर्भं सनातनम् ।
पीनवक्षःस्थलं वन्दे पूर्णं राघवनन्दनम् ॥ २ ॥

दशग्रीवरिपुं भद्रं दावतुल्यं सुरद्विषाम् ।
दण्डकामुनिमुख्यानां दत्ताभयमुपास्महे ॥ ३ ॥

कस्तूरीतिलकाभासं कर्पूरनिकराकृतिम् ।
कातरीकृतदैत्यौघं कलये रघुनन्दनम् ॥ ४ ॥

खरदूषणहन्तारं खरवीर्यभुजोज्ज्वलम् ।
खरकोदण्डहस्तं च खस्वरूपमुपास्महे ॥ ५ ॥

गजविक्रान्तगमनं गजार्तिहरतेजसम् ।
गम्भीरसत्त्वमैक्ष्वाकं गच्छामि शरणं सदा ॥ ६ ॥

घनराजिलसद्देहं घनपीताम्बरोज्ज्वलम् ।
घूत्कारद्रुतरक्षौघं प्रपद्ये रघुनन्दनम् ॥ ७ ॥

चलपीताम्बराभासं चलत्किङ्किणिभूषितम् ।
चन्द्रबिम्बमुखं वन्दे चतुरं रघुनन्दनम् ॥ ८ ॥

सुस्मिताञ्चितवक्त्राब्जं सुनूपुरपदद्वयम् ।
सुदीर्घबाहुयुगलं सुनाभिं राघवं भजे ॥ ९ ॥

हसिताञ्चितनेत्राब्जं हताखिलसुरद्विषम् ।
हरिं रविकुलोद्भूतं हाटकालङ्कृतं भजे ॥ १० ॥

रविकोटिनिभं शान्तं राघवाणामलङ्कृतिम् ।
रक्षोगणयुगान्ताग्निं रामचन्द्रमुपास्महे ॥ ११ ॥

लक्ष्मीसमाश्रितोरस्कं लावण्यमधुराकृतिम् ।
लसदिन्दीवरश्यामं लक्ष्मणाग्रजमाश्रये ॥ १२ ॥

वालिप्रमथनाकारं वालिसूनुसहायिनम् ।
वरपीताम्बराभासं वन्दे राघवभूषणम् ॥ १३ ॥

शमिताखिलपापौघं शान्त्यादिगुणवारिधिम् ।
शतपत्रदृशं वन्दे शुभं दशरथात्मजम् ॥ १४ ॥

कुन्दकुड्मलदन्ताभं कुङ्कुमाङ्कितवक्षसम् ।
कुसुम्भवस्त्रसंवीतं पुत्रं राघवमाश्रये ॥ १५ ॥

मल्लिकामालतीजातिमाधवीपुष्पशोभितम् ।
महनीयमहं वन्दे महतां कीर्तिवर्धनम् ॥ १६ ॥

इदं यो राघवस्तोत्रं नरः पठति भक्तिमान् ।
मुक्तः संसृतिबन्धाद्धि स याति परमं पदम् ॥ १७ ॥

॥ इति श्रीराघवस्तोत्रं सम्पूर्णम् ॥

---

२२. ॥ अथ [1]श्रीरामस्तवः ॥

भजेऽहं सदा राममिन्दीवराभं
भवारण्यदावानलाभाभिधानम् ।
भवानीहृदाभाचिदानन्दरूपं
भवाभावहेतुं भवादिप्रपन्नम् ॥ १ ॥

---

1. अशुद्धभूयिष्ठोऽयं स्तवः प्रासादिगुणोपेततया मुद्रितः ।

सुरानीकदुःखौघनाशैकहेतुं
नराकारदेहं निराकारमीड्यम् ।
परेशं परानन्दरूपं वरेण्यं
हरिं राममीशं भजे भारनाशम् ॥ २ ॥

प्रपन्नाखिलानन्ददोहं प्रसन्नं
प्रपन्नार्तिनिश्शेषनाशाभिधानम् ।
तपोयोगयोगीशभावादिभव्यं
कपीशादिमित्रं भजे राममित्रम् ॥ ३ ॥

सदा भोगभाजां सुदूरे विभान्तं
चिदानन्दकन्दं सदारामवेशम् ।
विदेहात्मजानन्दरूपं सुरेशं
महेशं नरेशानरामं प्रपद्ये ॥ ४ ॥

महायोगमायाविशेषानुयुक्त्या
सुराधीशलीलानराकारमूर्तेः ।
सदानन्दलीलाकथापूर्णकर्णाः
सदानन्दरूपा भवन्तीह लोके ॥ ५ ॥

अहंमानपानाभिमत्तः प्रमत्तो
न वेदाखिलेशाभिमानाभिमानः ।
इदानीं भवत्पादपद्मप्रसादात्
त्रिलोकाधिपत्याभिमानो विनष्टः ॥ ६ ॥

स्फुरद्रत्नकेयूरहाराभिरामं
धराभारभूतासुरानीकदावम् ।
शरच्चन्द्रवक्त्रं लसत्पद्मनेत्रं
दुराचारपारं भजे राघवेशम् ॥ ७ ॥

सुराधीशनीलाभ्रनीलाङ्गकान्तिं
विराधादिरक्षोवधालोकशान्तिम् ।
किरीटादिशोभं पुरारातिलाभं
भजे रामचन्द्रं रघूणामधीशम् ॥ ८ ॥

लसच्चन्द्रकोटिप्रकाशाधिपीठे
समासीनमेकं समाधाय सीताम् ।
स्फुरद्धेमवर्णां तटित्पुञ्जभासां
भजे रामचन्द्रं निवृत्तार्तितन्त्रम् ॥ ९ ॥

॥ इति श्रीरामस्तवः सम्पूर्णः ॥

२३. ॥ अथ श्रीसप्तर्षिरामायणम् ॥

काश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः ।
जमदग्निर्वसिष्ठश्च सप्तैते मुनिपुङ्गवाः ॥ १ ॥

काश्यपः –

जातः श्रीरघुनायको दशरथान्मुन्याज्ञया ताटकां
हत्वा रक्षितकौशिकक्रतुवरः कृत्वा ह्यहल्यां शुभाम् ।
भङ्क्त्वा रुद्रशरासनं जनकजामुद्वाह्य रामस्ततो
जित्वा चाध्वनि भार्गवं पुनरगात् सीतासमेतः पुरम् ॥ २ ॥

अत्रिः—

दास्या मन्थरया दयारहितया दुर्बोधया कैकयी
श्रीरामप्रथमाभिषेकसमये माताप्ययाचद्वरौ ।
भर्तारं, भरतः प्रशास्तु धरणीं रामो वनं गच्छता-
दित्याकर्ण्य वचः स्वयं दशरथो मौनीव तूष्णीं स्थितः ॥ ३ ॥

भरद्वाजः—

श्रीरामः पितृशासनाद्वनमगात् सौमित्रिसीतान्वितो
गङ्गां प्राप्य जटां निबध्य सगुहः श्रीचित्रकूटे वसन् ।
कृत्वा तत्र पितृक्रियां सभरतो दत्त्वाभयं दण्डके
गत्वागस्त्यमुनीश्वरात्तदनुजं लब्ध्वा धनुश्चाक्षयम् ॥ ४ ॥

विश्वामित्रः—

गत्वा पञ्चवटीमगस्त्यवचनाद्दत्त्वाभयं मौनिनां
भित्त्वा शूर्पणखासकर्णयुगलघ्राणं खरं खण्डयन् ।
त्रातुं सर्वमुनीश्वरान् विदलयन् मायामृगं वालिनं
तारारत्नमवैरि राज्यमखिलं कर्तुं च सुग्रीवसात् ॥ ५ ॥

गौतमः—

दूतो दाशरथेः सलीलमुदधिं तीर्त्वा हनूमान् महान्
दृष्ट्वाशोकवने स्थितां जनकजां दत्त्वाभयं मुद्रिकाम् ।
अक्षादीनसुरान्निहत्य महतीं दग्ध्वा च लङ्कां पुनः
श्रीरामान्तिकमेत्य देव जननी दृष्टा च सीता मया ॥ ६ ॥

जमदग्निः—

रामो बद्धपयोनिधिः कपिवरैर्वीरैर्नलाद्यैर्वृतो
लङ्कां प्राप्य सकुम्भकर्णदनुजं हत्वा रणे रावणम् ।
तस्यां स्थाप्य विभीषणं पुनरगात् सीतापतिः पुष्पकं
ह्यारूढः पुनरागतः सभरतः सिंहासनस्थो बभौ ॥ ७ ॥

वसिष्ठः—

हेमस्तम्भसहस्रषोडशमहासौधान्तराग्रे लस-
द्वेदिस्थं नवरत्नकीलितमहासिंहासने सीतया ।
शत्रुघ्नेन च लक्ष्मणेन भरतेनाराधितं राघवं
विश्वामित्रवसिष्ठपूर्वमुनिभिः पट्टाभिषिक्तं भजे ॥ ८ ॥

श्रीरामो हयमेधमुख्यमखकृत् सम्यक् प्रजापालनं
कृत्वा भृत्यसुतानुजैश्च सुचिरं भूयः सधर्मान्वितौ ।
पुत्रौ भ्रातृसुतान्वितौ कुशलवौ संस्थाप्य भूमण्डले
सायोध्यापुरवासिभिश्च सरयूं स्नात्वा प्रयातो दिवम् ॥ ९ ॥

श्रीरामस्य कथासुधातिमधुरान् श्लोकानिमानुत्तमान्
ये शृण्वन्ति पठन्ति च प्रतिदिनं पापौघविध्वंसिनः ।
श्रीमन्तो बहुपुत्रपौत्रसहिता भोगान् स्थिरं भुञ्जते
भोगान्ते सहबान्धवाश्च सुचिरं विष्णोर्लभन्ते पदम् ॥ १० ॥

॥ इति श्रीसप्तर्षिरामायणं सम्पूर्णम् ॥

---

२४. ॥ अथ श्रीवीरराघवप्रपत्तिः ॥

श्रीधर्मसेननृपरम्यसुतासमेतं
श्रीभूसहायममलं श्रितपारिजातम् ।
श्रीशेषभोगशयनेऽतिसुखं शयानं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ १ ॥

हृत्तापनाशनसरोत्तरतीरवासं
हृत्पुण्डरीककुहरे समसन्निविष्टम् ।
श्रीशालिहोत्रमुनिपुङ्गवसेव्यमानं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ २ ॥

वीक्षाटवीविहरणक्षमपादपद्मं
वेद्यं सदा विजयकोटिविमानसेव्यम् ।
विश्वम्भरं विधिशिवेन्द्रनिषेव्यमाणं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ३ ॥

सस्नेहभक्तिभयभूकमलाकराब्ज
संवाह्यमानचरणं सरसीरुहाक्षम् ।
सौम्यं समस्तजगदेकनिवासभूतं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ४ ॥

पद्मोपमानपदपाणिविलोचनाढ्यं
पद्मानिवासगृहबाहुयुगान्तरालम् ।
पद्मासनायुतनिकेतनपद्मनाभं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ५ ॥

आरोग्यपुत्रविलसत्कविनाञ्जनैक
राज्याधिपत्यवरदाननिवाददीक्षम् ।
मोक्षप्रदं स्वपदवन्दकवैष्णवानां
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ६ ॥

मध्येशिखं सुरवरैः परमैरशेषै-
रार्योपचित्तविभवैरतिशुद्धसत्त्वैः ।
अप्राकृतैरतिसमश्रितपादपद्मं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ७ ॥

रामानुजार्यमुखपद्मसहस्रभानुं
पूर्णार्यवर्यनयनोत्पलपूर्णचन्द्रम् ।
श्रीयामुनार्यहृदयाम्बुजचञ्चरीकं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ८ ॥

श्रीराममिश्रकमलाक्षवरार्यनाथ-
योगीन्द्रतीर्थविभवं शठकोपवन्द्यम् ।
शय्यासु सागरसुतापरिचर्यमाणं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ९ ॥

श्रीमच्छठारिपरकालयतीन्द्रमुख्यै
र्दिव्यप्रबन्धनिवहैरनुबध्यमानम् ।
पूर्वैः सदा गुरुवरैः प्रथितानुभावैः
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ १० ॥

हृत्तः सदानु परमं परिशुद्धदिव्यं
दुग्धाम्बुधिं सकलसंश्रितरक्षणाढ्यम् ।
हृत्तापनाशनतटीरतयावसानं
श्रीवीरराघवमहं शरणं प्रपद्ये ॥ ११ ॥

सौम्योपयन्तृमुनिना करुणाविरक्ति
धीभक्तिशान्तिमुखसद्गुणसागरेण ।
संसेव्यमानचरणं जगतां शरण्यं
श्रीवीरराघवमहं शरणंप्रपद्ये ॥ १२ ॥

॥ इति श्रीवीरराघवप्रपत्तिः सम्पूर्णा ॥

२५. ॥ अथ श्रीरघुनाथमङ्गलस्तोत्रम् ॥

मङ्गलं लोकरामाय रघुरामाय मङ्गलम् ।
मङ्गलं पद्मवक्त्राय रामभद्राय मङ्गलम् ॥ १ ॥

मङ्गलं कोसलेन्द्राय रामचन्द्राय मङ्गलम् ।
मङ्गलं मम नाथाय रघुनाथाय मङ्गलम् ॥ २ ॥

मङ्गलं रणधीराय रघुवीराय मङ्गलम् ।
मङ्गलं सत्यसन्धाय राजसिंहाय मङ्गलम् ॥ ३ ॥

मङ्गलं निरवद्याय वेदवेद्याय मङ्गलम् ।
मङ्गलं मुक्तिमूलाय मेघनीलाय मङ्गलम् ॥ ४ ॥

मङ्गलं सत्वरध्वस्तरुद्रचापाय मङ्गलम् ।
मङ्गलं जानकीनेत्रपूर्णपात्राय मङ्गलम् ॥ ५ ॥

मङ्गलं मिथिलानाथमौलिरत्नाय मङ्गलम् ।
मङ्गलं निस्सपत्नाय मङ्गलं नीलशालिने ॥ ६ ॥

मङ्गलं मैथिलीधन्यवनवासाय मङ्गलम् ।
मङ्गलं लक्ष्मणोपात्तभृत्यकृत्याय मङ्गलम् ॥ ७ ॥

मङ्गलं गुहसङ्गेन गङ्गाकूलनिवासिने ।
मङ्गलं गौतमीतीरपारिजाताय मङ्गलम् ॥ ८ ॥

मङ्गलं दण्डकारण्यवासिनिर्वातचेतसे ।
मङ्गलं शबरीदत्तफलमूलाभिलाषिणे ॥ ९ ॥

मङ्गलं सद्गुणारोपचापहस्ताय मङ्गलम् ।
मङ्गलं वायुपुत्रेण वन्दनीयाय मङ्गलम् ॥ १० ॥

मङ्गलं वालिसुग्रीवहर्षशोकाभिघातिने ।
मङ्गलं मैथिलीमौलिमणिरञ्जितवक्षसे ॥ ११ ॥

मङ्गलं सर्वलोकानां शरण्याय महीयसे ।
मङ्गलं सागरोत्साहश्रृङ्गभङ्गविधायिने ॥ १२ ॥

मङ्गलं वासवामित्रमर्दनोद्वृत्तबाहवे ।
मङ्गलं विश्वमित्राय विद्रावणदयादृशे ॥ १३ ॥

मङ्गलं वीक्षमाणाय मैथिलीवदनाम्बुजम् ।
मङ्गलं विनिवृत्ताय पुरं पौरनिवृत्तये ॥ १४ ॥

मङ्गलं भरतप्रीतिप्राप्तराज्याय मङ्गलम् ।
मङ्गलं मैथिलीयोगमहनीयाय मङ्गलम् ॥ १५ ॥

मङ्गलं हारकोटीरपादपीठाय मङ्गलम् ।
मङ्गलं रङ्गधुर्याय तुङ्गपन्नगशायिने ॥ १६ ॥

मङ्गलं सह्यजामात्यसान्निध्यकृतचेतसे ।
मङ्गलं मानुषे लोके वैकुण्ठमिति तिष्ठते ॥ १७ ॥

शेषशैलनिवासाय श्रीनिवासाय मङ्गलम् ।
मङ्गलं वेधसो वेदिमेदिनीगृहमेधिने ॥ १८ ॥

वरदाय दयाधाम्ने वीरोदाराय मङ्गलम् ।
मङ्गलं धनदादानदत्तसक्तिषि सम्पदे (?) ॥ १९ ॥

मङ्गलं नारसिंहाय नरसिंहाय मङ्गलम् ।
मङ्गलं मामहीनीलानित्यमुक्तैकचक्षुषे ॥ २० ॥

य इदं कीर्तयेन्नित्यं मङ्गलं मङ्गलस्तवम् ।
वर्तयेत् पुरतस्तस्य मङ्गलायतनं हरिः ॥ २१ ॥

॥ इति श्रीरघुनाथमङ्गलं सम्पूर्णम् ॥

---

२६. ॥ अथ श्रीराममङ्गलाशासनम् ॥

श्रीमन्मार्ताण्डवंशे दशरथनृपतेरात्मजत्वं प्रपन्नः
साकं शेषारिसङ्ख्यैर्निशिचरनिवहं संहरिष्यन् सुरार्थे ।
गुर्वादेशेन हत्वा पथि रजनिचरीं प्राप्य सिद्धाश्रमं यः
चक्रे यज्ञस्य रक्षां स दिशतु भगवान् मङ्गलं रामचन्द्रः ॥ १ ॥

राज्यं गच्छन् मुनीनामथ पथि विगलच्छापशल्यामहल्यां
कृत्वा भङ्क्त्वा भवानीरमणभुजसरोजालयं चापदण्डम् ।
पाणौ कृत्वावनेयीं भृगुसुतविजयी भ्रातृभिः प्राप्तदारैः
योऽवात्सीदात्मपुर्यां स दिशतु भगवान् मङ्गलं रामचन्द्रः ॥ २ ॥

मातुर्वाचा सुमित्रातनयजनकजामात्रमित्रप्रविष्टः
कान्तारं शान्तचेताः कलशभवमुनेराश्रमं प्राप्य भूयः ।
प्रीत्यै तस्य प्रतिज्ञां निशिचरकुलनिर्मूलनायात्तरोषः
चक्रे यो विश्ववीरः स दिशतु भगवान् मङ्गलं रामचन्द्रः ॥ ३ ॥

यस्या भ्राता दशास्यो निशिचरतरुणीं कामुकीं कारयित्वा
भ्रात्रा तां कृत्तनासां झटिति खरमुखं राक्षसौघं च हत्वा ।

मायाशक्त्यैव रक्षोमुषितजनकजः क्लृप्तसुग्रीवसख्यः
यो जघ्ने वानरेन्द्रं स दिशतु भगवान् मङ्गलं रामचन्द्रः ॥ ४ ॥

नष्टां कान्तां विचेतुं दिशि दिशि चलिते वानराणां निकाये
श्रुत्वा कान्ताप्रवृत्तिं पवनसुतगिरा प्राप्तपाथोधितीरः ।
आग्नेयास्त्रानुभावक्षपितमदभरं दीनदीनं नदीनं
तेने यो मानशाली स दिशतु भगवान् मङ्गलं रामचन्द्रः ॥ ५ ॥

मध्येपाथोधि बद्धां झटिति गिरिशतैः सेतुमाढैक्य लङ्कां
हत्वा सभ्रातृमित्रं रणशिरसि रुषा रावणं दारचोरम् ।
कान्तां स्वीकृत्य शुद्धां ज्वलनपतनतः प्राप्य रम्यामयोध्यां
योऽवात्सीदात्तमोदः स दिशतु भगवान् मङ्गलं रामचन्द्रः ॥ ६ ॥

यो नित्यं रामचन्द्रस्तुतिमिति जपति ध्वस्तसर्वारिसङ्घो
भुक्त्वा भोगानभीष्टानभिनवयशसा पूरयित्वा त्रिलोकीम् ।
अन्ते सञ्चिन्त्य कान्ताधनतनयगृहाद्येषु रूढं ममत्वं
साक्षादालीयतेऽसौ भगवति भवसिन्धुप्लवे चक्रपाणौ ॥ ७ ॥

श्रीराघवं दशरथात्मजमप्रमेयं
सीतापतिं रघुकुलान्वयरत्नदीपम् ।
आजानुबाहुमरविन्ददलायताक्षं
रामं निशाचरविनाशकरं नमामि ॥ ८ ॥

॥ इति श्रीराममङ्गलाशासनं सम्पूर्णम् ॥